CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्र. १६८३२

पु. १२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६.२ १९८३

५.१२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.
१

श्रीगणेशाय नमः ॥ ॥महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्व
यि गिरः ॥ अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिक
रः ॥ १ ॥ ॥विश्वेश्वरं गुरुं नत्वा महिम्नाख्यस्तुतेः परम् ॥ पूर्वाचार्यकृतव्याख्यासंग्रहः क्रियते म
या ॥ १ ॥ एवं किल व्याख्यायते कश्चिद्गंधर्वराजः कस्यचिद्राज्ञः प्रमदवने कुसुमानि हरन्नासीत्
तज्ज्ञात्वा च शिवनिर्माल्यलंघनेन मम पुष्पचोरस्यांतर्द्धानादिकासमर्थापि शक्तिर्विनंक्ष्यतीत्यभि
प्रायेण राज्ञा शिवनिर्माल्यं पथि निक्षिप्तं तदप्रतिसंधाय च गंधर्वराजस्तत्र प्रविशन्नेव कुंठश
क्तिर्बभूव ततश्च शिवनिर्माल्यलंघनेनैव ममैतादृशं वैकल्यमिति प्रणिधानेन विदित्वा परमका राम: १
रुणिकं भगवंतं सर्वकामदं तमेव तुष्टाव न तु स्तुतिर्नाम गुणकथनं तच्च गुणज्ञानाधीनमज्ञातस्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथनार्हं भवान्न्यूनः त्वं भगवतो गुणानामनंतत्वेन ज्ञातुमशक्यत्वात्कथनरूपा स्तुतिरननुरूपा भ
वेदननुरूपकरणं चोपहासायैवेत्याशंक्य तदपनोदनव्याजेन स्वस्यानौद्धत्यं दर्शयन्नेव भगवं
तं स्तोतुमारभते॥ महिम्न इति॥ हे हर सर्वाणि दुःखानि हरतीति हरः योग्यं संबोधनं। सर्वदुःख
हरत्वेनैव प्रसिद्धो सिद्धो न मम दुःखहरणे पृथग्व्यापारं करिष्यसीत्यभिप्रायः। हे सर्वदुःखहर
ते तव महिम्नः परं पारमवधिमविदुषा एतावानेव महिमेति इयत्तया ऽजानतः कर्तृत्वसंबंधे
षष्ठी। अज्ञानकर्तृका स्तुतिः यद्यसदृशी अननुरूपा अयोग्येति यावत्। तत्र हि ब्रह्मादीनां सर्वज्ञा
नामपि गुणकथनरूपा गिरस्त्वयि विषये ऽवसन्ना अयोग्याः इत्यर्थः तैरपि इयत्तया ऽज्ञानात्।
तेषामपि इयत्ताया असत्त्वेन सार्वज्ञस्य व्याघातोपि न। सन्मात्रविषयत्वात्सार्वज्ञस्य। अन्यथाश्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.
२

तित्वप्रसंगात्॥ तथाचश्रीभागवते विद्वान्नुवीर्यगणनांकतमोर्हतीहयःपार्थिवान्यपिकविर्विम
मेरजांसिइति। अथेतिपक्षांतरेयद्येवंब्रूषेत्वमतिपारणामोबुद्धिविषयतामेवावधिर्यद्वेतिक्रि
याविशेषणं। स्वबुद्ध्यावधिविषयीकृतंतावद्गुणान्वावक्तुमिच्छामिफलायकथयन्सर्वोपिस्तोता
ननभवाच्यः। अनुपालंभनीयः। सावाग्ययातस्यगुणान्गृणीते। जिह्वासतीदार्दुरिकेवसूतन
चोपगायत्युरुगायगाथा इतिश्रीभागवतवचनात्। नहिनभःपतंत्यात्मसमंपतत्रिण इतिन्या
येनममाप्येषपरिकरः आरंभःस्तोत्रे स्तुतिविषयेनिरपवादः खलुगणनीयः स्वबुद्ध्यनुसारेणायोगपइ
त्यर्थः। प्रथमार्द्धेनस्तुतिनिराकरणव्याजेनसर्वदुरधिगममहिमत्वरूपामहतीस्तुतिःकृता॥ ग.म.
उत्तरार्द्धेनस्तुतिसमाधानव्याजेनसर्वस्तुत्यरूपेतिमहत्कौशलम्॥ अन्यच्चसर्वगंधर्वराजस्यम २

हाक्कुशलत्वादेकेनैव श्लोकेन यथाश्रुतेन वक्रीत्या च। हरिशंकरयोः स्तुतिस्तयोरभेदज्ञानायाभि
प्रेतातत्र हरपक्षे यथाश्रुतं व्याख्यातं। हरिपक्षेपि तद्व्योजनीयं। संबोधनं तु। अहरेति। हर
तीति हरः संहर्ता न विरुद्धोऽहरः पालयितेत्यर्थः। अथवा। हे परम। परा मा लक्ष्मीर्यस्य हे लक्ष्मीपते
लक्ष्मीपतित्वेन समाप्य लक्ष्मीनाशायिष्यतीति योग्यसंबोधनं यदि तेन त्वत्संबोधिनी त्वद्विषया
स्तुतिः तत्र हि अवसन्ना अल्पा असदृशी अननुरूपापि सत्तु नाम अन्यदेवानामनल्पाऽनुरूपापि अ
त्र हेतुगर्भं विशेषणं तव कीदृशस्य ब्रह्मादीनां स्तावकानां गिरः स्तुतिरूपायाः पारं विदुषः स्तोतुः अ
मंस्तुतेर्गुणादोषो वज्ञानत इत्यर्थः। सर्वदेवस्तुत्यत्वेन निरतिशयसार्वज्ञेन च तवैव सर्वोत्कृष्ट
त्वादित्यभिप्रायः स्तुतिफलं दर्शयन् स्वस्य विनयातिशयं दर्शयितुमाह।। अथ स्वं न्नामः। तिपरिणा·

म॰ २ मावधिमतिक्रांतोत्कृष्टपरिणामावधिः सीमा यत्र एतादृशं यथा स्यात्तथा [illegible] मति [illegible] मतिक्रम्यापिग
णान्। स्मरन् सर्वोपि जनः॥ आ वाच्यः आभिमुख्येन वाच्यः संभावनीयस्तवेयमर्थः॥ यस्मात् सदैवा
नुगृह्यते त्वया स्तोता तएव ममापि स्तोत्रे स्तुतिकार्य्ये एष परिकरो नमस्कारादिप्रबंधः कीदृशः अ
निरपवादः न विद्यते निरपवादो यस्मात् स तथा अहरिति विप्सनीयम्। अहरहः सर्वदेत्यर्थः य
द्विषयकस्तुतिकर्तृत्वेनान्योपि सर्वदा नमस्याः किमुवक्तव्यं सर्वदा सर्वेषां नमस्यतरो भविष्यती
ति भगवति भक्त्यतिशयो व्यज्यते। एवं यस्यायोग्यापि स्तुतिः। सा नित्यरूपानस्य योग्याया स्तुतिः
किं वा सा न फलिष्यतीति ध्वनितम्। हरपक्षे प्येवं तत्र परमश्रेष्ठेति संबोधनम्॥ १॥ ॥
अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि॥ सकस्य (राम: २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥ ॥
पुनरपि स्तूयत्वे नैव भगवंतं स्तोति पूर्वोक्तं स्वस्य त्रस्मादिसाम्यमुपपादयन् ॥ अतीत इत्यादि। पूर्वो
क्तं संबोधनमावर्तनीयम्। तव महिमा सगुणो निर्गुणश्च वाङ्मनसयोः पंथानं विषयत्वं अती
तः अतिक्रांतः चशब्दोऽवधारणो ऽतीत एवेत्यर्थः॥ अनंतत्वान्निर्धर्मकत्वाच्च। तथा च श्रुतिः यतो वा
चो निवर्तन्ते अप्राप्य मनसा सहेति। वागविषये तत्र श्रुतेः प्रामाण्यं न स्यादित्याशंकाह॥ यं श्रुति
रपि। अपौरुषेया पि वेदवाणी चकितं भीतं यथा स्यात्तथा ऽभिधत्ते तात्पर्येणैव प्रतिपादयति सगु
णपक्षे किंचिदपि अनुक्तं माभूदिति। निर्गुणपक्षे तु स्वप्रकाशः परप्रकाशानपेक्षः प्रकाशकत्वा
त्प्रदीपप्रकाशवत्॥ स्वप्रकाशकस्याऽस्याधीनप्रकाशता माभूदिति केन प्रकारेण। अतद्व्यावृत्त्या। स·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म: ४ गुणपक्षेन तयोरन्तिरतयोरन्निरूपयाः अभेदेनेत्यर्थः। सर्वं खल्विदं ब्रह्म सर्वकर्मा सर्वकामइत्यादि
वाक्यं सर्वाभेदेनैव भगवन्तं प्रतिपादयन्ति। नन्वेकैकशो महिमानं वदन्तीत्यर्थः। निर्गुणपक्षे तु। नत
दन्तत। न विद्यते न तत्कार्यात्मकमुपाधिद्वयमिति यावत्॥ तस्मात्तत्परित्यागेन जहदजह
ल्लक्षणयेत्यर्थः। मायाविद्योपहितचैतन्यशक्तं तत्पदं तत्कार्य्यबुद्ध्याद्युपहितचैतन्यशक्तं त्वंप
दं उपाधिद्वयभागत्यागेनानुपहितचैतन्यस्वरूपं स्वप्रकाशमिति। तदाकारवृत्तिमात्रजननेना
विद्यातत्कार्य्यनिवृत्त्या वा बोध्यत एवेति न तावता विषयत्वं मुख्यं तस्येत्यर्थः। अत एव सः
तादृशः सगुणो निर्गुणश्च स हि माकस्य स्तोतव्यः कर्तुं शिवश्चीन केनापि स्तोतुं शक्यत इत्यर्थः। सगुण राम: ४
स्य स्तोतव्यत्वाभावे हेतुमाह॥ कतिविधगुणाः। कतिविधा अनेकप्रकारा गुणा यत्र। स तथा अनन्त

त पा दो क्तं अभिप्रेतैः अत्रायमत्र नारायण यरनिर्व्याप्ति हे अन्ते कृर्ना आप्य समेवास्य कान्त कद्विनिरा कन म. विविधशब्दादिप्रमाणैर्वर्णनीयत्वे। द्विविधाकारधी
सकृन्मोघा। भेव्यकात्वं इति व्याप्यत्वं. था स्त्रेन्द्रियसन्निकृष्टार्थाकारसाक्षीपरिणामावच्छिन्नाविदंता ज्ञानप्राकट्याश्रयत्वं फलव्याप्यत्वं ८

त्वादेव न स्तुत्य इत्यर्थः निर्गुणस्य स्तोतव्यत्वाभावे हेतुमाह। कस्य विषय इति। न कस्यापि विषयो
निर्धर्मकत्वादत एवाविषयत्वान्न स्तुत्यर्थः सगुणो ज्ञेयत्वेप्यनन्तत्वान्निर्गुणस्त्वेकरूपोपि ज्ञेय
त्वाभावान्न। स्तुत्यर्हश्चेत्तर्हि स्वमतिपरिणामाऽवधिगृणन्निति पूर्वोक्तं विरुध्येतेत्यत आह पदे
त्विति। अर्वाचीनेन वीने भक्तानुग्रहार्थं लीलया गृहिते वृषभपिनाकपार्वत्यादिविशिष्टरूपे
कस्य विदुषो मनो न पतति नाऽऽविशति। कस्य वचो नाविशति। अपितु सर्वस्यैव मनो वचश्चा
ऽऽविशतीत्यर्थः। तत्र हिरण्यगर्भस्यास्मदादेश्च सममेव स्तुतिकर्तृत्वमिति न पूर्वापरो विरोधः
हरिपक्षेप्येवं। अथवायं अतद्व्यावृत्त्या कार्यप्रपंचभेदाच्चकितं सं भिन्नत्वेन कार्यप्रपंचं मापश्य नपेक्ष
न्तु इति शंकमानं श्रुतिरभिधत्त इति पूर्ववत्॥ अर्वाचीने पदे तु कमलकंदुकोमोदकीरथांगकम.

म॰ ५ नात्वयाकौस्तुभाद्युपलक्षिते। नवजलधरश्यामत्विश्रीविग्रहेवैकुंठधामनिवेशा वा इन्द्रादिविधि
धविस्तारपरायणोगोपकिशोरेवा वृंदावनेवर्तितिनिकस्यमनो नाःपततिकस्यवचश्चनापततिअ
परागतानिविस्तारोयस्मात्तदपततिसंकुचितमित्यर्थः। तवश्रीविग्रहानुचिंतनेत्वद्गुणानुक
थनेचविषयांतरपरित्यागेनविलीयमानंविस्तरंमनोवचश्चैकमात्रविषयतयासंकुचितंभव
तितवश्रीविग्रहेकाशक्तंभवतीत्यर्थः॥ २ ॥ ॥मधुस्फीतावाचःपरममं
मृतंनिर्मितवतस्तवब्रह्मन्किंवागपिसुरगुरोर्विस्मयपदम्॥ ममत्वेतांवाणींगुणकथन
पुण्येनभवतःपुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता॥ ३॥ ॥नन्वेवंस्तुत्यत्वेपिह म॰ ५
रिहरयोःसर्वज्ञयोरभिनवयास्तुत्यानमनोनुरंजनंकृतेनतत्प्रसादस्तंविनानफलमितिपु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरपिस्तुतेर्वैयर्थ्यंप्राप्तौसार्थकंदर्शयन्स्तौति।मधुस्फीतेति।हेब्रह्मन्विभोसुरगुरोर्बृहस्पतेरपि
वाक्वाणीतवकिंविस्मयपदंचमत्कारकंकिंशब्दआक्षेपे।नेत्यर्थः।तत्रहेतुगर्भंविशेषणा
माह।तवकीदृशस्यमधुवत्स्फीतामाधुर्य्यादिशब्दगुणालंकारविशिष्टत्वेनमधुरांवाचःतथा
परममृतंनिरतिशयामृतवदास्वाद्यमेतेनार्थगतमाधुर्य्यमुक्तम्।परमेश्वरवाचांशब्दार्थ
गतयोर्निरतिशयमाधुर्य्ययोरपिमिथस्तारतम्यंमध्वमृतशब्दाभ्यांद्योत्यते।अथचवाचामुत्क
र्षोमहान्स्वच्छशब्दगुणालंकारादतिशयिनोऽर्थगुणालंकाराइतियत्रहिरण्यगर्भस्यवाण्यपिनच
मत्कारकारणंतत्रकावार्ताऽस्मदादिवाण्याइतितर्हिकिंस्तुत्येत्यतआह।ममत्विति।हेपुरमथन
त्रिपुरान्तकभवतोगुणकथनपुण्येनएतांस्ववाणींपुनामिनिर्मलीकरोमीत्यभिप्रायेणएतस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म·
८ न्नर्थे स्तुतिरूपे मम भुङ्क्ष्व्यर्थ्यवसितात्‌उ यतानन्तु स्तुतिकौशल्येन त्वां वर्णयामीत्यभिप्रायेणोत्यर्थः ॥
मनोनैर्मल्येवाङ् नैर्मल्यं नांतरीयमिति स्तुतेः सार्थकत्वमुक्तम् ॥ हरिपक्षेप्येवम् । मिथ्यते स्मिन्नद
ध्याद्रीति मथनं गोकुलम् । अथवा ॥ मथ्यते यो ऽमृतार्थमिति मथनः क्षीरोदः पुरं मन्दिरं मथनं गो
कुलं क्षीरोदो वा यस्येति । पुरमथनसंबोधनार्थः अन्यत् सर्वं समानं अथवा हेत्रुस्तनवाचः सर्व
स्यापि परमसृतं निरतिशयसारं निश्चयेन मितवतः खलु भ्राजु भवतः सुरगुरोर्हिरण्यगर्भस्या
पि सर्वदेवतोपास्यस्य तव मधुस्फीतामधुरिमगुणव्याप्ता अन्तराकटुत्वलेशेनापि रहिता वा
गपि वागरदेवतासरस्वत्यपि किं विस्मयपदं नेत्यर्थः । तस्यामवावस्थ्र महदन्तरमिति प्रसिद्धमेव । एम·
६
यद्येवं तथापि त्वद्दिक्षु यैव ममेयं प्रवृत्तिरित्याह ॥ ममत्वेतामिति ॥ निजगुणकथनपुण्येन मम

त्वेतां। मम त्वेवर्त्तमानां संसारकर्माकर्मेदूषितां वा वंएतस्य स्फुनितकर्तुरितिशेषः पुनामिनिष्कलुषी
करोमि इत्येतस्मिन्नर्थे हे परमथनभवतो उञ्जिघ्रेवस्थिता यतो हेतोरनायन्ना एवं मम प्रवृत्तिरिस
र्थः। श्रुतिश्च। एषतस्यैव साधुकर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एषतस्यैवासाधु
कर्मकारयति तं यमधो निनीषत इति। स्मृतिश्च। अज्ञो जंतुरनीशोयमात्मनः सुखदुःखयोः॥ ई
श्वरःप्रेरितो गछेत् स्वर्गं वाश्वभ्रमेव वा इति॥ तेन परमकारुणिकस्त्वं च शरणागतवाणीपावन
पुराणं हेतुस्तुतितत्परं लोकं कर्तुं स्वयमेव प्रयतमानो यया कयापि स्तुत्या प्रसादसीत्यर्थः॥ २ ॥
॥ ॥तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु॥
अभव्यानामस्मिन्वरद रमणीयामरमणीं विहंतुं व्याक्रोशीं विदधत इहैके जडधियः॥ ४ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म. ८

एवंहरिहरयोःस्तुत्यर्थत्वंसफलस्तुतिंचनिरूप्ययेकेचित्सार्थीयांसस्तुतत्सद्भावेपिविवदन्तेता
न्निराशायस्तौति। तवैश्वर्यमित्यादि। हेवरदईप्सितप्रदयत्तवैश्वर्यंतद्विहन्तुंनिराकर्तुंएके
जडधियःकेचित्मंदबुद्धयःव्याक्रोशीविदधतेसाक्षेपमुच्चैर्भाषणमाक्रोशस्तस्यव्यतीहारोव्या
क्रोशी। अन्येनकर्त्तुमारब्धमन्यःकरोतिअन्येनचान्यइतिकर्मव्यतिहारः॥ व्याङ्पूर्वःक्रोशःकर्मव्य
तिहारेणच्॥ ततःस्वार्थेऽण्॥ ततःस्त्रियांङीप्॥ तांव्याक्रोशींअहमहमिकयाकुर्वतेयत्सर्वंप्रमा
णप्रमितंतदपिजिघांसंतीतियत्तन्मांमंदबुद्धित्वंद्योतितं। अतएवकर्त्रभिप्रायेक्रियाफलेविद्
धातेरात्मनेपदम्॥ नहितैर्व्याक्रोशीविधानात्तवैश्वर्यविघातःकिंतुतेषामेवाधःपातइत्यर्थः। राम: ८
कीदृशंतवैश्वर्यंजगदुदयरक्षाप्रलयकृत्॥ जगतआकाशादिप्रपंचस्यउदयंसृष्टिंरक्षांस्थितिं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रलयं संहारं च करोतीति स तथाऽनेनाऽनुमानं मानमुक्तं तच्चाऽज्ञानमानो लोका इत्यत्र व्यक्तं च दृश्यते।
तथा त्रयीवस्तु व्यस्तं त्रयीणां वेदानां तात्पर्येण प्रतिपाद्यं सर्ववेदा यत्पदमामनन्तीति श्रुतेः अने
नागमप्रमाणमुक्तं तथा गुणैः सत्वरजस्तमोभिर्लीलया त्र्यन्त्रैभिन्नत्वान्न पृथग्भूतं अनेनत्र व
स्तु गत्याऽभेद इत्यर्थः॥ निस्तुषनत्रपुत्रस्वविष्णुशिवाख्यासु व्यस्तं विविच्य न्यस्तं प्रकटीकृतमिति
यावत्। उपलक्षणं चैतत् सर्वाऽवतारगणामेतेन प्रत्यक्षं प्रमाणमुक्तम्। तेन सर्वप्रमाणप्रमि
त इत्यर्थः॥ कीदृशी व्याक्रोशी अस्मिन्न भव्यानामस्मिन् लोके नास्ति भव्यं कल्याणं येषां तेऽभव्यास्तेषां
रमणीयां मनोहरां वस्तुतोऽरमणीयाममनोहरां अमनोहरेऽपि मनोहरत्वबुद्धिरस्या नातिशयां ते
षामित्यर्थः॥ हरिपक्षेप्येवं॥ अथवाऽस्मिन्न वैष्णव्यैः भाग्यानां मध्ये जगदधियोज्ञ उमतेरत्यंतमपहृत्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰ ८ म्येत्यर्थः। तस्य वस्तुतोऽरमणीयां व्याक्रोशीम्। विहन्तुं एके सुख्याः रमणीयां व्याक्रोशीं विदधत इत्यर्थः। ज
डधिय इत्येकवचनेन पूर्वपक्षिणाम्लघुत्वं एके इति बहुवचनेन सिद्धान्तिनामतिमहत्त्वं सूचितम्॥
॥४ ॥ ॥ किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपा
दान इति च॥ अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय
जगतः॥ ५ ॥ ॥ ये त्वात्मप्रत्यक्षमबुध्यन्ते त्रयीं चान्यथा वर्णयन्ति तेऽनुमानेनैव नि
र्णकार्याः। तत्र चानुमानं क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति। जगदुदयरक्षाप्रलयकृदित्य
नेन सूचितम्। तत्र पूर्वश्लोकोक्तव्याक्रोशीवीजं प्रतिकूलतर्कमुद्भावयतः पूर्वपक्षिणो निराकर्व राम: ८
न्नस्तौति अथवा कीदृशीं व्याक्रोशीं विदधत इत्याकांक्षायां तावदन्नस्तौति किमीह इति हे वरदेति पूर्वे

स्नोकात्संबोधनानुषंगः त्वयिविषयेऽयंकुतर्कस्तर्काभासः कांश्चिन्मूढधियः कानपि उपहतधीन्जग
तो विश्वस्यापि मोहायान्यथाप्रतिपत्तये मुखरयति वाचालान्करोति। त्वयिकीदृशेऽतर्क्यैश्वर्ये तत्त
र्कागोचरमैश्वर्यं यस्य तस्मिन् सर्वतर्कागोचरे। त्वयियः कश्चित्तर्कः स्यात्तं त्रोपन्यस्यते स स सर्वो
प्याभास इत्यर्थः प्रमाणानां स्वगोचरशून्यत्वात्स्वागोचरे प्रमाणाभावो युक्त एवेति भावः। कुतर्क
मेवाह। किमीह इत्यादिना। स धाता परमेश्वरः त्रिभुवनं सृजतीति सिद्धान्तमनूद्य दूषणमाह। स्व
ल्वकिंतु किमीहः का ईहा चेष्टा यस्येति तथा कः कायः शरीरं कर्तृरूपं यस्येति किंकायः कः उपायः
सहकारिकारणमस्येति किमुपायः क आधारोऽधिकरणमस्येति किमाधारः किमुपादानं समयिका
रणं भुवनाकारेणानित्याश्रमस्येति किमुपादानः सर्वत्र किंशब्द आक्षेपे इति शब्दः प्रकारार्थे स्वशब्दः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म. शंकांतरसमुच्चयार्थः कुलालो हि घटं कुर्वन् स्वशरीरे व्याप्रियमाणेन चक्रभ्रमणादिचेष्टया सलिल
९ सूत्राद्युपायेन चक्रादाधारे मृदमुपादानभूतं घटाकारं करोति॥ एवं जगत्कर्तापि वाच्यः तथा च
कुलालादिवदनीश्वरएवेत्यभिप्रायः घटादिदृष्टांतेन च स्वतनुक्षित्यादेः सकर्तृकत्वं साध्यते तथा च घटा
दिकर्तरि कर्तृत्वौपयिकं यावद्दृष्टं क्षित्यादिकर्तर्यपि तावद्रूपमंगीकर्तव्यं दृष्टांतस्य तुल्यत्वान्न
था चोभयतः पाशारज्जुः स्यदंगीकारे स्मदादितुल्यत्वादनीश्वरत्वं। तदनंगीकारे च कर्तृत्वानुपपत्त्याऽ
सिद्धिरेवेत्येवं कुतर्क इत्यर्थः सिद्धांतेन वदं तर्कं विशिनष्टि। अनवसर उक्तः॥ नास्त्यवसरोऽवकाशोऽ
स्येत्यनवसरः अत एव उक्तः उक्तत्वेन स्थितः विचित्रनानाशक्तिमायावशेन सर्वं निर्मातरि सर्वतर्का रामः ९
गोचरत्वयिनास्तिकुतर्कावसर इत्यर्थः। तथा चोक्तम्॥ अचिंत्याः खलु ये भावा न तांस्तर्केण योजये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिति। न च घटादिकर्तरि यावद्दृष्टं तावत् क्षित्यादिकर्तर्यपि साधनीयम्। व्याप्तिं विना सामानाधिक
रणमात्रस्यासाधकत्वात्। अन्यथा महानसे धूमवह्न्योर्व्याप्तिग्रहसमये अंजनादिमत्त्वमपि दृष्ट
मिति पर्वतादावपि तदनुमानं स्यात्॥ तस्मात् साधर्म्यसमानजातिरेषा स्वव्याघातकत्वाद् दूषणांतर
म्। पराक्रांतं चात्र सूरिभिरित्युपरम्यते हरिपक्षेप्येवम्॥ ५॥ ॥ अजन्मानो लोकाः कि
मवयववंतोपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति॥ अनीशो वा कुर्याद् भुवनजनने
कः परिकरो यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे॥ ६॥ ॥ एवं प्रतिकूलं तर्कं परि
हृत्यानुकूलतर्कसज्ञावयं स्तौति॥ अजन्मान इति। हे अमरवर सर्वदेवश्रेष्ठ। अवयववन्तोपि साव
यवा अपि लोकाः क्षित्यादयः किमजन्मानः जन्महीनाः किं नु जन्या एवेत्यर्थः। तेन सावयवत्वेन क्षि

म
१०

त्वादेर्न जन्यत्वहेतोरसिद्धत्वं तथाऽजगतां जन्यानां क्षित्यादीनां भवविधिरुत्पत्तिक्रियाऽधिष्ठातारं
कर्तारमनादृत्यानपेक्ष्य किं भवति। अपितु। अपेक्षैव भवतीत्यर्थः॥ तेन कार्यत्वसकर्तृकत्वयोरव्य
भिचारान्नानैकान्तिकत्वं हेतोः॥ तथाऽनीशो वाईश्वरादन्यो वा यदि कुर्यात्तर्हि भुवनजनने कः परिक
रं का सामग्री अनीश्वरस्य स्वशरीररचनामप्यजानतो विचित्रचतुर्दशभुवनरचनाऽसंभवादीश्व
रश्चरचनां करोतीत्यर्थः परिकरमिति पाठे को वाऽनीश्वरो भुवनजनने परिकरमारंभं कुर्यात्
अपितु ईश्वर एव कुर्य्यादित्यर्थः एतेनार्थान्तरतापरिहृता एवमनुमानदोषानुद्धृत्य शंकितदोषां
तरं निराकुर्वन्नुपसंहरति। यत इति। यत एवं सर्वं प्रमाणासिद्धत्वं अतस्ते मंदा मूढा नतु विद्वांसः इमे रामः १०
ये त्वां प्रतिसंशेरते संदेहवन्तः किमुत विपर्य्ययवन्त इत्यर्थः जन्माद्यस्य यत इति न्यायेन यतो वा इमा

निभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्ब्रह्मआनंदोब्रह्मेतिव्यजानादित्या
दिश्रुतिरेवपरमेश्वरेप्रमाणमनुमानंत्वनुकूलतर्कमात्रंश्रुतेर्नस्वातन्त्र्येणप्रमाणमितिद्रष्टव्यं
हरिपक्षेप्येवम्॥ ६॥ ॥त्रयीसांख्यंयोगःपशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमि
दमदःपथ्यमितिच॥रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामेकोगम्यस्त्वमसिपय
सामर्णवइव॥ ७॥ ॥एवंभगवद्विमुखान्निरस्यसर्वेषांशास्त्रप्रस्थानानांभगवत्येवतात्पर्यं
साक्षात्परंपरयावेतिवदन्स्तौतित्रयीसांख्यमितिहेऽमरवरनानाअसंकीर्णाःपंथानःनानाप
थाःऋजवश्चकुटिलाश्चऋजुकुटिलाःऋजुकुटिलाश्चतेनानापथाश्चेतितेऋजुकुटिलनानापथाः
तान्जुषन्तेभजन्तीतितथातेषांनृणांअधिकार्यनधिकारिसाधारणानांतत्साधनानुष्ठानेसा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म. क्षात्परंपरया वा त्वमेव एको गम्यः प्राप्यः नान्यः कश्चिदित्यर्थः तत्र दृष्टान्तमाह। पयसामर्णव इव॥
११ यथा ऋजुपथजुषां गंगादिपयसां साक्षादर्णवो गम्यः यथा वा कुटिलपथजुषां सरय्वादीनां गंगा
दिप्रवेशद्वारा परंपरया एवं वेदान्तश्रवणमननादिनिष्ठानां साक्षात्त्वं प्राप्यः अन्येषामन्तः
करणशुद्धिद्वारा तन्मतपरंपरया त्वमेव प्राप्यः चेतनत्वेनैव मोक्षयोग्यत्वाभ्युपगमात् परात्मान
भ्युपगमाच्चेत्यर्थः॥ ननु ऋजुमार्गे सति तं विहाय किमिति कुटिलमार्गं भजन्ति ऋजुमार्गस्यैव शी
घ्रफलदायित्वादत आह। प्रभिन्ने प्रस्थाने इदं परं पथ्यमदः पथ्यमिति रुचीनां वैचित्र्यात्तस्मिन्। त
स्मिन्शास्त्रप्रस्थाने इदमेव श्रेष्ठमिदमेव मम हितमिति इच्छाविशेषाणामनेकप्रकारत्वात्तद्गुणाग म्नः
भवीयतत्तत्कर्मवासनावशेन ऋजुकुटिलत्वनिश्चयासामर्थ्यात्कुटिलेपि ऋजुभ्रान्त्या प्रवर्तन्ते ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यर्थः अथ प्रस्थानभेदमेव दर्शयति। त्रयी सांख्यमित्यादि। सर्वशास्त्रोपलक्षणमेतत्। तथाहि।
त्रयीशब्देन वेदत्रयीवाचिनाऽनउपलक्षिताऽष्टादश विद्याप्यत्र विवक्षिता॥ तत्र ऋग्वेदो यजुर्वेदः
सामवेदोऽथर्ववेद इति वेदाश्चत्वारः शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति षडंगा
नि वेदस्य॥ पुराणानि न्यायो मिमांसा धर्मशास्त्राणि चेति चत्वार्युपांगानि। अत्रोपपुराणानां
पुराणेष्वन्तर्भावः। वैशेषिकशास्त्रस्य न्याये वेदान्तशास्त्रस्य मिमांसायां महाभारतरामायण
सांख्यपातंजलपाशुपतवैष्णवादीनां धर्मशास्त्रेषु मिलित्वा चतुर्दश विद्या। तथा चोक्तम्। पुरा
णन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति॥ एता एव च
तुर्भिरुपवेदैः सहाष्टादश विद्या भवंति। आयुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रं चेति चत्वा रउ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰ पवेदाःताएताअष्टादशविद्याःत्रयीसांख्यमित्यादिनोपन्यस्ताः।अन्यथान्यूनताप्रसंगात्।सर्वेषामा
१२ स्तिकानामेतावत्स्वेवशास्त्रप्रस्थानानि॥अन्येषामप्येकदेशिनामेष्वेवांतर्भावात्।ननुनास्तिका
नामपिप्रस्थानान्तराणिसंति।तान्येतेष्वंतर्भावातएयगणनापितुसूचितानि।तथाहिशून्यवा
देनैकंप्रस्थानंमाध्यमिकानांक्षणिकविज्ञानवादेनयोगाचाराणांज्ञानाकारानुमेयक्षणिका
बाह्यार्थवादेनापरंवैभाषिकानांसौगतानांप्रस्थानचतुष्टयम्।तथादेहात्मवादेनैकंप्रस्थानंचा
र्वाकाणाम्।एवंदेहातिरिक्तदेहपरिमाणात्मवादेनद्वितीयंप्रस्थानंदिगंबराणाम्।एवंमिलित्वा
नास्तिकानांषट्प्रस्थानानि।तानिकस्मान्नोच्यन्ते।सत्यंवेदबाह्यत्वात्तेषांम्लेच्छादिवत्परंपरया रमः
पिपुरुषार्थानुपयोगित्वादुपेक्षणीयत्वमेव।इहच।साक्षात्परंपरयावापुमर्थोपयोगिनांवेदो १२

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पकरणानामेवप्रस्थानानां भेदोदर्शितोऽतोनन्यूनत्वशंकावकाशः।अथसंक्षेपेणतेषांप्रस्थाना
नांस्वरूपभेदहेतुप्रयोजनभेदश्चोच्यते।बालव्युत्पत्तये।तत्रधर्मब्रह्मप्रतिपादकमपौरुषेयंप्रमा
णवाक्यंवेदः।सचमंत्रब्राह्मणात्मकः।तत्रमंत्राअनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकास्त्रि
विधाऋग्यजुःसामभेदात्।तत्रपादबद्धागायत्र्यादिछंदोविशिष्टाऋचः।अग्निमीळेइत्याद्याः।ता
एवगीतिविशिष्टाःसामानि।तदुभयविलक्षणानियजूंषि।अग्नीदग्नीन्विहरेदित्यादिसंबोधन
रूपानिगदसंज्ञान्यपियजुरन्तर्भूतान्येव।तदेवंनिरूपिताःमंत्राः।ब्राह्मणमपित्रिविधंविधि
रूपमर्थवादरूपंतदुभयविलक्षणंच।तत्रशब्दभावनाविधिरितिभाट्टाः।नियोगोविधिरितिप्रा
भाकराः।इष्टसाधनतांविधिरितितार्किकादयःसर्वोविधिरपिचतुर्विधः।उत्पत्त्यधिकारविनियो ग.प्र.भे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰ गभेदात्॥तत्रकर्मस्वरूपमात्रबोधकोविधिरुत्पत्तिविधिःराग्नेयोष्टाकपालोभवतीत्यादिः।सेति
१२ कर्तव्यताकस्यकरणस्ययागादेःफलसंबंधबोधकोविधिःदर्शपौर्णमासाभ्यांस्वर्गकामोयजे
धन्य ३ तइत्यादि।अंगसंबंधबोधकोविधिर्विनियोगविधिःव्रीहिभिर्यजेतसमिधोयजतीत्यादिःसांगप्रधा
नकर्मप्रयोगैक्यबोधकोपूर्वोक्तविधित्रयमेलनरूपःप्रयोगविधिःसचश्रौतइत्येकोकल्पइत्य
मरे।कर्मस्वरूपंचद्विविधंगुणकर्मअर्थकर्मच।तत्रक्रतुकारककारणाश्रित्यविहितंगुणकर्म
तदपिचतुर्विधम्।उत्पत्त्याप्तिविकृतिभेदात्।तत्रवसंतेब्राह्मणोग्नीनादधीतपूर्घंतक्षतीत्या
दौआधानतक्षणादिनासंस्कारविशेषविशिष्टाअग्निसूपादेरुत्पत्तिः।स्वाध्यायोध्येतव्यःगांप एमः
योगोरध्वीत्यादौअध्ययनदोहनादिनाविद्यमानस्यैवस्वाध्यायपयःप्रभृतेःप्राप्तिः।सोममभि १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षुणोति व्रीहीनवहंति आज्यं विलापयतीत्यादौ अभिषवावघातविलापनैः सोमादीनां विकार
व्रीहीन्प्रोक्षति आज्यमवेक्षत इत्यादौ प्रोक्षणादिभिर्व्रीह्याज्यादिद्रव्याणां संस्कारः एत
च्चतुष्टयं चांगमेव। तथा क्रत्वकारकान्यनाश्रित्य विहितमर्थकर्म तच्च अर्थकर्म द्विविधं अंगं
प्रधानं च। अस्यार्थमंगमनन्यार्थं प्रधानम्। अंगमपि द्विविधं सन्निपत्योपकारकमारादुपका
रकं च। तत्र प्रधानस्वरूपनिर्वाहकं प्रथमं। फलोपकारि द्वितीयम्। एवं संपूर्णांगोपेतो विधिः प्र ग५
कृतिः विकलांगयुक्तो विधिर्विकृतिः। तदुभयविलक्षणो विधिर्दर्वीहोमः एवमन्यदप्यूह्यम्।
तदेवं निरूपितो विधिभागः। प्राशस्त्यनिंदान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः।
स त्रिविधः। गुणवादोऽनुवादो भूतार्थवादश्चेति॥ तत्र प्रमाणांतरविरुद्धार्थबोधको गुणवादः आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म:
१५

दित्योयूपइत्यादि।प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः अग्निर्हिमस्य भेषजमित्यादि।प्रमाणान्त
रविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः इन्द्रोवृत्रायवज्रमुदयच्छदित्यादि। तदुक्तम्। विरो
धेगुणवादः स्यादनुवादोऽवधारिते।भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः इति तत्र त्रिवि
धानामप्यर्थवादानां विधिस्तुतिपरत्वे समानेपि भूतार्थवादानां स्वार्थेपि प्रामाण्यं देवताधि
करणन्यायात्।अबाधिताज्ञातज्ञापकत्वं हि।प्रामाण्यं तच्चाबाधितविषयत्वात् ज्ञातज्ञापक
त्वाच्च न गुणवादानुवादयोः भूतार्थवादस्य तु स्वार्थे तात्पर्यरहितस्याप्यो न क्षणिकं प्रामाण्यं न वि
हन्यते। तदेवं निरूपितोऽर्थवादभागः।विध्यर्थवादोभयविलक्षणं तु वेदार्थवाक्यं तच्चाज्ञातज्ञा।

पकत्वेप्यनुष्ठानाप्रकाशकत्वान्न विधिः स तत्पुरुषार्थः परमानन्दज्ञानात्मकब्रह्मणि स्वार्थे उ.

ए म:
१५

पक्रमोपसंहारादिषु द्विधतात्पर्य्यलिंगवत्तया स्वतःप्रमाणभूतं। सर्वानपि विधीनन्तःकरणेषु
द्धिधारास्वविशेषतामायादयन्स्यशेषत्वाभावाच्चनार्थवादः। तस्मादुभयविलक्षणमेववेदां
तवाक्यम्॥ तच्चक्वचित्स्वार्थज्ञापकत्वमात्रेणविधिरितिव्यवह्रियते। विधिपदरहितप्रमा
णवाक्यत्वेनचक्वचिद्भूतार्थवाद इतिव्यवह्रियत इतिनदोषः। तदेवंनिरूपितंत्रिविधंब्राह्मणं।
एवंचकर्मकाण्डब्रह्मकाण्डात्मकोवेदोर्थःधर्मार्थकाममोक्षहेतुःसचप्रयोगत्रयेणयज्ञनि
र्वाहार्थमृग्यजुःसामभेदेनभिन्नः तत्रहोत्रप्रयोगऋग्वेदेन। आध्वर्य्यवप्रयोगोयजुर्वेदेन। औ
द्गात्रप्रयोगःसामवेदेन। ब्राह्मणयजमानप्रयोगौतुत्रैवान्तर्भूतौ। अथर्ववेदस्तुयज्ञानुपयु
क्तःशांतिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षणएव। एवंप्रवचनभे

दात्तप्रतिवेदंभिंनाभूयस्योगाथा।एवंचकर्मकाण्डव्यापारभेदेपिसर्वासांवेदशाखानांएकरूपत्व
मेवब्रह्मकाण्डइतिचतुर्णांवेदानांप्रयोजनभेदेनभेदउक्तः।अथांगानामुच्यते।तत्र शिक्षायाउ
दात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यंजनात्मकवर्णोच्चारणविशेषज्ञानंप्रयो
जनम्।तदभावेमंत्राणामनर्थकत्वात्।तथा चोक्तम्॥मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयु
क्तोनतमर्थमाह।सवाग्वज्रोयजमानंहिनस्तियथेंद्रःशत्रुस्वरतोऽपराधात्इति।तत्रसर्ववेदसा
धारणीशिक्षाअअथशिक्षाप्रवक्ष्यामीत्यादिपंचखण्डात्मिकापाणिनिनाप्रकाशिता।प्रतिशा
खाचभिन्नरूपाःप्रातिशाख्यसंज्ञिताअन्यैर्मुनिभिःप्रदर्शिताः।एवंवैदिकपदसाधुत्वज्ञानेनो
हादिकंव्याकरणस्यप्रयोजनम्।तच्चचतुरादेजित्वायष्टाध्यायात्मकंमहेश्वरप्रसादेनभगव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तापाणिनिनैव प्रकाशितं तत्र कात्यायनमुनिना पाणिनीयसूत्रेषु वार्त्तिकं विरचितम् । तद्वार्त्तिको
परि च भगवता पतंजलिना महाभाष्यमारचितम् । तदेतत् त्रिमुनिव्याकरणं वेदांगं माहेश्वरमि
त्याख्यायते । कौमारादिव्याकरणानि तु न वेदांगानि किंतु लौकिकप्रयोगमात्रज्ञानार्थानीत्य
वगंतव्यम् । एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वे च ज्ञाते वैदिकमंत्रपदानामर्थ
ज्ञानाकांक्षायां तदर्थं भगवता यास्केन समाम्नायः समाम्नातः स व्याख्यातव्य इत्याद्यद्वादशाध्याया
त्मकं निरुक्तमारचितम् । तत्र च नामाख्यातोपसर्गनिपातभेदेन चतुर्विधं पदजातं निरूप्य वैदि
कमंत्रपदानामर्थः प्रदर्शितः । मंत्राणामनुष्ठेयार्थप्रकाशनद्वारेणोपकरणत्वात् पदार्थज्ञाना
धीनत्वाद्वाक्यार्थज्ञानस्य मंत्रस्थपदार्थज्ञानाय निरुक्तमवश्यमपेक्षितं अन्यथानुष्ठानासंभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰ १९ त॥ स्तरोपवज्जर्भरिस्रुपर्फरीतुरित्यादिउरुहाणां प्रकाराणां तेषामर्थज्ञानस्यासंभावनीयत्वाच्च। एवं
निघंटवोपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मकाः निरुक्तांतर्भूता एव तत्रापि निघं
टुसंज्ञकः पंचाध्यायात्मको ग्रंथो भगवता यास्केनैव कृतः एवंच मंत्राणां पादबद्धछंदोविशे·
षविशिष्टत्वात्तदज्ञानेन निंदाश्रवणात् छंदोविषयनिमित्तानुष्ठानविशेषविधानाच्च छंदोज्ञाना
कांक्षायां तत्प्रकाशनाय धीश्रीस्त्रीमित्यष्टाध्यायात्मिका छंदोविवृतिर्भगवता पिंगलेन
रचिता। तत्राद्यं लौकिकमित्यंतेनाध्यायत्रयेण गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जग
तीति सप्तछंदांसि सावांतरभेदानि निरूपितानि। अथ लौकिकमित्यध्यायपंचकेन पुराणेतिहा रामः १९
सोपयोगीनि लौकिकछंदांसि प्रसंगान्निरूपितानि· व्याकरणे लौकिकपदनिरूपणवत्। एवं वे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिककर्मांगदर्शादिकालज्ञानायज्योतिषंभगवताऽऽदित्येनगार्गादिभिश्चप्रणीतम्॥ बहुविधस्य ए
वंशाखान्तरीयगुणोपसंहारेणवैदिकानुष्ठानक्रमविशेषज्ञानायकल्पसूत्राणितानिचप्र ९
योगत्रयभेदात्त्रिविधानितत्रहौत्रप्रयोगप्रतिपादकान्याश्वलायनसांख्यायनादिप्रणीतानि
आध्वर्य्यवप्रयोगप्रतिपादिकानिबौधायनकात्यायनादिप्रणीतानि। औद्गात्रप्रयोगप्रतिपादकानि
लाट्यायनद्राह्यायणादिप्रणीतानि। एवंनिरूपितःषण्णामंगानांप्रयोजनभेदः। चतुः। चतुर्णामुपांगाना
मधुनोच्यते। तत्रसर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितप्रतिपादकानिभगवताबादरायणेनपुरा
णानिकृतानि। तानिचब्राह्मं१ पाद्मं२ वैष्णवं३ भागवतम्४ नारदीयम्५ मार्कण्डेयम्६ भविष्यम्
७ ब्रह्मवैवर्तम्८ आग्नेयम्९ लैंगम्१० वाराहम्११ स्कान्दम्१२ वामनम्१३ कौर्मम्१४ मात्स्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प· १५ गारुडम् १६ ब्रह्माण्डम् १७ शैवम् १८ चेत्यष्टादश। आद्यं सनत्कुमारेण प्रोक्तं वेदविदां वर। द्वितीयं ना
७ रसिंहाख्यं तृतीयं नान्दमेव च॥ चतुर्थं शिवधर्माख्यं दौर्वासं पंचमं विदुः॥ षष्ठं तु नारदीयाख्यं कापि
लं सप्तमं विदुः॥ अष्टमं मानवं प्रोक्तं ततस्त्वौशनसेरितम्॥ ततो ब्रह्माण्डसंज्ञं तु वारुणाख्यं ततः परम्
ततः कालीपुराणाख्यं विशिष्टं मुनिपुंगवाः॥ ततो वाशिष्ठलैंगाख्यं प्रोक्तं माहेश्वरं परम्॥ ततः साम्ब
पुराणाख्यं ततः सौरं महाद्भुतम्॥ पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परम्॥ भार्गवाख्यं ततः प्रोक्तं
सर्वधर्मार्थसाधकम्॥ एवमुपपुराणान्यप्यनेकप्रकाराणि द्रष्टव्यानि। न्याय आन्वीक्षिकी पंचाध्या
यी गोतमेन प्रणीता। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प रामः १७
वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाख्यानां षोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञा

नंतस्यप्रयोजनम्॥एतदपिन्यायपरेनोक्तम्।एवंमीमांसापिद्विविधाकर्ममीमांसाशारीरकमीमां
साच।तत्रद्वादशाध्यायीकर्ममीमांसाअथातोधर्मजिज्ञासेत्यादिरन्वाहार्यंचदर्शनादित्यंताभग
वताजैमिनिनाप्रणीता।तत्रधर्मप्रमाणंधर्मभेदाभेदौशेषशेषिभावःक्रत्वर्थपुरुषार्थभेदःप्रयु·
क्तौविशेषःक्रत्यर्थपठनादिक्रमभेदोधिकारविशेषःसामान्यातिदेशविशेषातिदेशऊहः
बाधस्तंत्रप्रसंगश्चेतिक्रमेणद्वादशाध्यायानामर्थास्तथासंकर्षणकाण्डमपिअध्यायचतुष्ट
यात्मकंजैमिनिनाप्रणीतम्।तच्चदेवताकाण्डमितिप्रसिद्धमप्युपासनाख्यकर्मप्रतिपादक
त्वात्कर्ममीमांसांतर्गतमेव।तथाचतुरध्यायीशारीरकमीमांसाअथातोब्रह्मजिज्ञासेत्यादिर
नावृत्तिःशब्दादित्यंताजीवब्रह्मैक्यसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकन्यायायोपदर्शे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यंनीभगवताबादरायणेनकृता।तत्रसर्वेषामेववेदान्तवाक्यानांसाक्षात्परंपरयावाप्रत्यगभिं
म. १८ नाद्वितीयेब्रह्मणितात्पर्यमितिसमन्वयःप्रथमाध्यायेनप्रदर्शितः।तत्रप्रथमेपादेस्पष्टब्रह्मलिं
गयुक्तानिवाक्यानिविचारितानि।द्वितीयेपादेत्वस्पष्टब्रह्मलिंगान्युपास्यब्रह्मविषयाणि।तृती
यपादेऽस्पष्टब्रह्मलिंगानिप्रायशोज्ञेयब्रह्मविषयाणि।एवंवेदांतानामद्वयेब्रह्मणिसिद्धेसम
न्वयेतत्रसंभावितस्मृतितर्कादिविरोधमाशंक्यतत्परिहारःक्रियतइत्यविरोधोद्वितीयाध्याये
नदर्शितः।तत्राद्यपादेसांख्ययोगकाणादादिस्मृतिभिःसांख्यादिप्रयुक्ततर्कैश्चविरोधोवेदान्त
समन्वयस्यपरिहृतः।द्वितीयेपादेसांख्यादिमतानांदुष्टत्वंप्रतिपादितंस्वपक्षस्थापनपरपक्ष राम: १८
निराकरणरूपपर्वद्वयात्मकत्वाद्विचारस्य।तृतीयेपादेमहाभूतसृष्ट्यादिश्रुतीनांपरस्परंविरो

धःपूर्वभागेनपरिहृतःउत्तरभागेनतुजीवविषयाणांचतुर्थपादेइंद्रियविषयाणांश्रुतीनांविरोध
परिहारःतृतीयेध्यायेसाधननिरूपणंतत्रप्रथमेपादेजीवस्यपरलोकगमनागमननिरूपणेन
वैराग्यंनिरूपितंद्वितीयेपादेपूर्वभागेनत्वंपदार्थःशोधितःउत्तरभागेनतत्पदार्थःशोधितःतृती
येपादेनिर्गुणेब्रह्मणिनानाशाखापठितापुनरुक्तपदोपसंहारःकृतःप्रसंगाच्चसगुणविद्यासु
शाखांतरीयगुणोपसंहारानुपसंहारौनिरूपितौचतुर्थपादेनिर्गुणब्रह्मविद्यायाबहिरंगसाध
नान्याश्रमयज्ञादीन्यंतरंगसाधनानिशमदमादीनिचनिरूपितानि चतुर्थेध्यायेसगुणनिर्गुण
विद्ययोःफलविशेषनिर्णयःकृतःतत्रप्रथमेपादेश्रवणाद्यावृत्त्यानिर्गुणंब्रह्मउपासनावृत्त्यास
गुणंब्रह्मसाक्षात्कृत्यजीवतःपापपुण्यालेपलक्षणाजीवन्मुक्तिरभिहिता॥द्वितीयेम्रियमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.
१८
णस्योत्क्रांतिप्रकारश्चिन्तितः तृतीयेपादेसगुणब्रह्मविदोमृतस्योत्तरमार्गोभिहितः चतुर्थपादेपू
र्वभागेणोनिर्गुणब्रह्मविदोविदेहकैवल्यप्राप्तिरुक्ताउत्तरभागेनसगुणब्रह्मविदोब्रह्मलोकस्थि
तिरुक्तेति।इदमेवसर्वशास्त्राणांमूर्द्धन्यंशास्त्रांतरंसर्वमस्यैवशेषभूतमितीदमेवमुमुक्षुभि
रादरणीयं।श्रीशंकरभगवत्पादोदितप्रकारेणेतिरहस्यं।एवंधर्मशास्त्राणिमनुयाज्ञवल्क्यवि
ष्णुयमांगिरोवशिष्ठदक्षसंवर्तशातातपपराशरगौतमशंखलिखितहारीतापस्तंबोशनोव्या
सकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिःकृतानिवर्णाश्रमधर्मविशेषाणांविभागे
नप्रतिपादकानि।एवंव्यासकृतंमहाभारतंवाल्मीकिकृतंरामायणंचधर्मशास्त्रमध्यएवांतर रामः
भूतम्।।स्वयमितिहासत्वेनप्रसिद्धम्।।सांख्यादीनांधर्मशास्त्रांतर्भावेपिइहस्वशब्देनैवनिर्देशा १८

तएषयोगेवसंगतिर्व्याख्या॥ अथवेदचतुष्टयस्यक्रमेणचत्वारउपवेदाः तत्रआयुर्वेदस्याष्टौस्थानानिभ
वन्ति।सूत्रंशारीरमैन्द्रियंचिकित्सानिदानंविकल्पःसिद्धिश्चेति।ब्रह्मप्रजापत्यश्विधन्वन्तरीन्द्रभ
रद्वाजात्रेयाग्निवेशादिभिरुपदिष्टश्चरकेणसंक्षिप्तःतत्रैवसुश्रुतेनपंचस्थानात्मकंप्रस्थाना
न्तरंकृतंएवंवाग्भटादिनापिबहुधातेनशास्त्रभेदः॥कामशास्त्रमपिआयुर्वेदान्तर्गतमेवसु
श्रुतेनवाजीकरणाख्यकामशास्त्रस्याभिधानात्।तत्रवात्स्यायनेनपंचाध्यायात्मकंकामशा
स्त्रंप्रणीतंतस्यचविषयवैराग्यंप्रयोजनंशास्त्रोद्दीपितमार्गेणापिविषयभोगेदुःखमात्रप
र्यवसानात्चिकित्साशास्त्रस्यरोगसाधनरोगनिवृत्तितत्साधनज्ञानंप्रयोजनम्।एवंध
नुर्वेदःपादचतुष्टयात्मकोविश्वामित्रप्रणीतः।तत्रप्रथमोदीक्षापादःद्वितीयःसंग्रहपादःतृतीयः

म: सिद्धिपादः चतुर्थः प्रयोगपादः। तत्र प्रथमे पादे धनुर्लक्षणं अधिकारिनिरूपणं च कृतम्। तत्र ध
२० नुःशब्दस्यापरूढो। पि चतुर्विधायुधेषु वर्त्तते। तच्च चतुर्विधं मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तं चेति। त
च मुक्तं चक्रादि। अमुक्तं खड्गादि। मुक्तामुक्तं शल्यावावान्तरभेदादि। यन्त्रमुक्तं शरादि। तत्र मुक्तमस्त्रमित्यु
च्यते। अमुक्तं शस्त्रमित्युच्यते। तदपि ब्राह्मवैष्णवाग्नेयादिभेदादनेकविधं। एवं साधिदैवतेषु समन्त्र
केषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च ते चतुर्विधाः पदातिरथग
जतुरगारूढाः दीक्षाभिषेकशकुनमंगलकरणादिकं च सर्वमपि प्रथमपादे निरूपितम्॥ सर्वे
षाणां साचार्य्यस्य च लक्षणपूर्वकं संग्रहणप्रकारो दर्शितः॥ द्वितीयेपादे गुरुसंप्रदायसिद्धानां शस्त्र रा म: २०
विशेषाणां पुनः पुनरभ्यासो मंत्रदेवतासिद्धिकरणमपि निरूपितम्। तृतीयपादे देवतार्चनाभ्यासा

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

दिभिः सिद्धानामस्त्रविशेषाणां प्रयोगस्तत्तुर्थपादे निरूपितः क्षत्रियाणां स्वधर्मो युद्धं दुष्टदस्युचौरादि
भ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम्। एवं ब्रह्मप्रजापत्यादिक्रमेण विश्वामित्रप्रणीतं धनुर्वेदशा
स्त्रं। एवं वेदप्रयोजनम्। एवमर्थशास्त्रं च बहुविधम्। नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूपकारशास्त्रं
चतुःषष्टिकलाशास्त्रं चेति। नानामुनिभिः प्रणीतम्। तस्य च सर्वस्य लौकिकालौकिकतत्तत्प्रयोजन
भेदोऽद्रष्टव्यः। एवमष्टादशविद्यास्त्रयी। पदेनोक्ताः अन्यथा न्यूनताप्रसंगात्। तथा सांख्यशास्त्रं भगवता क
लेन प्रणीतम्। अत्र त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इत्यादि षडध्यायम्। तत्र प्रथमेऽध्याये विष
या निरूपिताः द्वितीयेऽध्याये प्रधानकार्य्याणि। तृतीयेऽध्याये विषयेभ्यो वैराग्यं चतुर्थे विरक्तानां पिंग
लाकुररादीनामाख्यायिकाः पंचमे परपक्षनिर्जयः षष्ठेऽध्याये सर्वार्थसंक्षेपः। प्रकृतिपुरुषविवेकज्ञानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स· सांख्यशास्त्रप्रयोजनम्। तथा योगशास्त्रं भगवता पतंजलिना प्रणीतं अथ योगानुशासनमित्यादि पादचतु
२१ ष्टयात्मकं। तत्र प्रथमपादे चित्तवृत्तिनिरोधात्मकः समाधिरभ्यासवैराग्यरूपं च तत्साधनं निरूपितम्।
द्वितीयेपादे विक्षिप्तचित्तस्यापि समाधिसिद्ध्यर्थं यमासनप्राणायामप्रत्याहारध्यानसमाधयोऽष्टा
गानि निरूपितानि। तृतीये पादे योगविभूतयः चतुर्थे पादे कैवल्यमिति। तस्य च विजातीयप्रत्ययनिरो
धद्वारेण निदिध्यासनसिद्धिः प्रयोजनम्। तथा पशुपतिमतं पाशुपतं शास्त्रम्। भगवता पशुपतिना प
शुपाशविमोक्षणाय अथातः पाशुपतं योगविधिं व्याख्यास्याम इत्यादि पंचाध्यायं विरचितम्। तत्राध्याय
पंचकेनापि कार्य्यरूपो जीवः पशुः कारणं पशुतीश्वरः योगः पशुपतौ चित्तसमाधानम् विधिर्भस्म एमः
नात्रिषवणास्नानादिर्निरूपितः दुःखांतसंज्ञो मोक्षस्त्वप्रयोजनम्। एवं कार्य्यकारणयोगविधिदुःखान्ताः २१

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

त्याख्यायंते। एवं वैष्णवं नारदादिभिः कृतं पंचरात्रं तत्र वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था
निरूपिता। भगवान् वासुदेवः सर्वकारणं परमेश्वरस्तस्मादुत्पद्यते संकर्षणाख्यो जीवस्तस्मान्मनः प्र
द्युम्नाख्यस्तस्माद् निरुद्धोऽहंकारः सर्वे चैते भगवतो वासुदेवस्यैवांशभूताः तदभिन्ना एवेति भगवतो वासु
देवस्य मनोवाक्कायवृत्तिभिराराधनं कृत्वा कृतकृत्यो भवतीति निरूपितम्। तदेवं दर्शितः प्रस्थानभेदः
सर्वेषां च संक्षेपेण त्रिविध एव प्रस्थानभेदः तत्रारंभवाद एकः परिणामवादो द्वितीयः विवर्तवादस्तृतीयः
पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्व्यणुकाद्याकारेण क्रमेण ब्रह्माण्डपर्यन्तं जगदार
भन्तेऽसदेव कार्यं कारणव्यापारादुत्पद्यत इति प्रथमः पक्षस्तार्किकमीमांसकानां। सत्वरजस्तमोगुणात्म
कं प्रधानमेव महदहंकारादिक्रमेण जगदाकारेण परिणमते पूर्वमपि सूक्ष्मरूपेण सदेव कार्यं कारण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰ २२ ऽपारेणाभिव्यज्यत इति द्वितीयः पक्षः सांख्ययोगपाशुपतानां। ब्रह्मणः परिणामो जगदिति वैष्णवाः स्वप्र
काशपरमानन्दाद्वयं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारेण कल्प्यत इति तृतीयपक्षो ब्रह्मवादिनां
सर्वेषां च प्रस्थानकर्तॄणां मुनीनां विवर्तवादपर्य्यवसानेनाद्वितीये परमेश्वर एव वेदान्तप्रतिपाद्ये ता
त्पर्य्यम्। न हि ते मुनयो भ्रान्ताः सर्वज्ञत्वात्। तेषां किन्तु बहिर्विषयप्रवणानामापाततः परमपुरुषार्थे
प्रवेशो न संभवतीति नास्तिक्यनिवारणाय तैः प्रकारभेदाः प्रदर्शिताः तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरु
द्धेप्यर्थे तेषां तात्पर्य्यमुत्प्रेक्षमाणास्तत्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना ऋजुकुटिलनानापथजुषो
भवन्ति। सर्वेषामृजुमार्ग एव पर्य्यवसानेपि परमेश्वराधनजनितान्तःकरणशुद्धिवशेन पश्चादृजुमार्गा
श्रयेणादेवेत्यर्थः। हरिपक्षेप्येवम्॥ ७ ॥ ॥ महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः कपा राम: २२

लंचेतीयत्तववरदतंत्रोपकरणम्॥ सुरास्तांतामृद्धिंदधतितुभवद्भ्रूप्रणिहितांनहिस्वात्मारामंविषय
मृगतृष्णाभ्रमयति॥ ८ ॥ ॥एवंसर्वशंकोद्धारेणहरिहरस्वरूपेनिरूप्यतदेवार्वाचीनपदस्थलो
तिमहोक्षःखट्वेतिहेवरदतवपरिपूर्णपरमेश्वरस्यापियत्तंत्रोपकरणम्। तंत्रस्यकुटुंबधारणस्यो
पकरणंसाधनम्। तदेवाहमहोक्षःमहान्उक्षावृद्धवृषभःखट्वांगंखट्वायाअवयवःशस्त्रविशेषः।
कापालिकानांप्रसिद्धःपरशुःटंकःकुठारोवा। अजिनंचर्म। भस्मःपांशुःफणिनःसर्पाःकपालंमनुष्यशिरो
स्थिचेतिसप्तकम्। नन्वेवंदरिद्रस्त्वंसोपिकिंदास्यतीत्यतआहःसुराइत्यादि। सुरास्तुभवत्सेवयाभव
द्भ्रूप्रणिहितांभवतोभ्रूविक्षेपमात्रेणसमर्पितांतांतामसाधारणींऋद्धिंसंपदंविदधति। धारयन्ति
त्वमतिदरिद्रस्त्वद्भृत्यास्तुसर्वेसुरास्त्वत्प्रसादात्समृद्धाइतिव्यतिरेकंतुशब्दआह। योह्यन्यान्धनवतः

म॰
२३
करोतिस नरपेक्षयाधिकः धनवान् भवति हि प्रसिद्धं लोके। ननु तर्हि ईदृशोपि स्वपं कथं महोत्साहिमा
त्रपरित्यागेन भाह। नहीत्यादि हि यस्मात् स्वात्मारामम्। स्वे आत्मनि स्वरूपे चिदानंदघने आरमन्त आत्मीऽ
त इति तथा तं न भ्रमयति न मोहयति विषयमृगतृष्णा विषया इंद्रियार्थाः शब्दस्पर्शरूपरसगंधाः त एव मृ
गतृष्णा जलबुद्ध्या गृह्यमाणा मरीचिका यथा मृगतृष्णा रश्मिरूपा जलविरुद्धस्वभावापि भ्रांत्या जलम
यी आभासते तथा विषया अपि दुःखरूपा भ्रांत्या सुखरूपा आभासंत इति रूपकार्थः यत्र जीवः स्वात्मार
मतां प्राप्तो न विषयासक्तो भवति तत्र किमु वक्तव्यं नित्यशुद्धः परमेश्वरो विषयैर्नाभिभूयत इत्यभि
प्रायः तेन वृष आरूढः स्वर्द्धारा परशुफणिकपालालंकृत चतुर्भुजाचर्मवसन भस्मांगरागा फणिक रा॰म॰ २३
पाल विविधभूषणा महेश्वरी मूर्तिर्गुणरूपदर्शनात्। कृत्यादिभिराराध्येत्यर्थः वक्तुत पुरुषप्रधान

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महदहंकारतन्मात्रेंद्रियभूतानि महोक्षादिरूपेण स्थितानि भगवन्तं महेश्वरमुपासते इत्यागमप्रसिद्धम्।
तस्य जगत्कुटुंबस्य तत्तान्येवोपकरणमिति निगर्वः हरिपरसेतु महोक्षखट्वङ्गं। अस्तोरथावयववकेच
विभीतकेसादृश्यात्पंडितजना विदुरिंद्रियाणीति धरणिः। महस्तेजोरूपम्। भस्मफणिनः भस्म
वत्सुभ्रस्य कोमलांगस्य च फणिनः शेषस्याजिनं शरीरत्वक खट्वा शय्या। तथा कपालं कं शिरः पाल्य
तेऽनेनेति कपालं शिर उपधानं तस्यैव भस्मफणिनोःऽङ्गं किंचिदुत्थितावयवविशेषः अथवा केन
जलेन तत्पाल्यते इति कपालम्। पद्मं। शंखो वा। तस्मिन्पक्षे भस्मफणिनोंगमजिनं वा। खट्वा। अं
गं। पर्य्यंकस्थानीयम्। अजिनं चोपर्य्यास्तरणवस्त्रस्थानीयमिति बोध्यम्। तथा परशुरिति परशुणामा
भिप्रायेण। हे वरद तव। एतावत्तंत्रोपकरणमित्यादि पूर्ववत्। अथवा विषयमृगतृष्णाः विद्यान्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म: २५ कारणोपरक्तंप्रतिविंबकल्पंजीवंव्यामोहयंत्यपिरामंअनंतसत्यज्ञानानन्दात्मकत्वेनयोगिनांरति
विषयंत्वांविवकल्पंनमोहयति।नस्वावरणांशेनाभिभवति।उपाधेःप्रतिविंबपक्षपातित्वात्।
कीदृशीसा।स्वात्मास्वःसच्चिदानदात्मकस्वरूपमेवात्मास्वरूपंयस्याःसातथात्वय्यध्यस्तासास्वस
न्नास्फूर्तिप्रदंत्वांकथंव्यामोहयेदित्यर्थः।अत्रापिचक्रादीनांभगवद्विभूतित्वंविष्णुपुराणादौप्रसि
द्धम्॥ ८ ॥ ॥ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिग
दतिव्यस्तविषये॥समस्तेप्येतस्मिन्पुरमथनतैर्विस्मितइवस्तुवंजिह्रेमित्वांनखलुननुधृष्टामु
खरता॥ ९ ॥ ॥एवंस्तुत्ययोर्हरिहरयोर्निर्गुणंसगुणंचरूपंनिरूपितंसंप्रतिस्तुतेः गम: २५
प्रकारंनिरूपयन्स्तौतिध्रुवमिति।हेपुरमथनस्तैःस्तुतिप्रकारैःत्वांस्तुवन्नजिह्रेमिनानुलज्जावि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मित इव ज्ञातचमत्कार इव। यथा कश्चिदद्भुतं दृष्ट्वा विस्मितस्तत्परवशत्वात्तत्कोपहासमगणयन्वि
चेष्टते तथाहमपि स्तोतुमर्थं न जानातीति जनो माम् उपहसिष्यतीति लज्जामगणयन्त्वत्स्तुतौ प्रवृत्तोऽस्मी
त्यर्थः। तैः कैः प्रकारैरित्याह। ध्रुवमित्यादि। कश्चित्कोपि सांख्यपातंजलमतानुसारी सर्वं समग्रं जग
द्ध्रुवं जन्मनिधनरहितं सदैव गाद इति यन्नं वदति। त्यर्थः न ह्यसतः उत्पत्तिः संभवति। न वा सतो विनाश
इत्याविर्भावतिरोभावमात्रमुत्पत्तिविनाशशब्दाभ्यामुपलभ्यते। तेन परमेश्वरोपि तावन्मात्रस्ये
ष्टेन तत्वसतउत्पत्तेः नापि सतो – विनाशस्येत्यभिप्राय इति सत्कार्यवाद एकः पक्षस्तथा परोऽन्यः सु
गतमतानुसारी सकलमिदमध्रुवं क्षणिकमिति वदति न हि सतः स्थिरत्वं संभवति। अर्थक्रियाका
रित्वमेव हि सत्वं तच्च समर्थस्याक्षेपायोगेन विलंबेन उपपद्यत इति एकस्मिन्नेव क्षणे सर्वार्थक्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म. क्रियासमावेशनन्तरक्षणेः सत्त्वमेव तथा च परमेश्वरस्यापि क्षणिकविज्ञानसंतानरूपत्वादस्माकं सततउत्प
२५ न्नैरीश्वरेन तु सतः स्थिरत्वायेति द्वितीयः पक्षः सर्वक्षणिकतावादन्नक्षराणः तदुभयपक्षासहिष्णुश्च पर
स्तार्किकः समस्तेष्वेतस्मिन् जगति ध्रौव्ये नित्यता नित्यत्वेव्यस्त विषये भिन्नधर्मिवर्तिनी गदति। आ
काशकालदिगात्ममनः पृथिव्यादिपरमाणवो नित्याः कार्यद्रव्याणि चानित्यानि तथा चानित्यानाम्
त्पत्तिविनाशयोरीश्वरस्य परमेश्वरः न तु नित्यानामपीत्यर्थः इत्येवं तृतीयः पक्षस्तथा च त्रिष्वप्येतेषु प
क्षेषु द्वैतांगीकारादद्वितीयसन्मात्ररूपस्य परमेश्वरस्य स्पर्शो नास्तीति श्लोकाधिकसंकुचिते
श्वर्यरूपेणास्तुतिः सर्वथाल्लज्जाकरीत्यर्थः तर्हि किमिति न लज्जस इत्यत आह। न तु असहायखल्ल नि रामः
श्चितं मुखरता वाचालता धृष्टानि लज्जा। तथा च मुखरतैव लज्जामपहरतीत्यर्थः। एतेन सर्वप्रकारेण २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाहकवा रात्रामाभासत्वमुक्तमद्वितीयवादस्यैवलज्ज्ञानात्परत्वेनसत्वत्वमितिइत्थंव्यंस्तनत्वत्वमर्क
स्त्वंसोमइत्यादौस्पष्टीकरिष्यते।हरिपक्षेप्येवम्।तत्रपुरमथनशब्दः।प्रागव्याख्यातः॥ ९ ॥ ॥
तवैश्वर्य्यंयत्नाद्यदुपरिविरिंचिर्हरिरधःपरिच्छेत्तुंयातावनलमनिलस्कंधवपुषः॥ततोभक्तिश्र
द्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिमनुवृत्तिर्नफलति॥ १० ॥ ॥
एवंश्लोकनवकेनस्तुतिसामग्रीनिरूप्यस्तुतौप्रस्तुतायांसमस्तप्रभावतामग्रेसरयोर्हरिविरंच्योर
पित्वत्प्रसादादेवत्वत्साक्षात्कारइत्येवंनिरतिशयंमाहात्म्यंप्रकटयन्स्तौतितवैश्वर्य्यमिति
हेगिरिश।तवानुवृत्तिःसेवाकिंनफलति।अपितुसर्वमेवफलतित्वत्साक्षात्कारपर्य्यंतंफलं
ददातीत्यर्थः।तत्रान्वयव्यतिरेकाभ्यांकारणतांदर्शयितुंभगवदनुवृत्तिव्यतिरेकेणफलव्यतिरेकमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म:
२६

हाय। यस्मादनलस्कंधवपुषः तेजःपुंजमूर्त्तेस्तस्यैवैश्वर्यं स्थूलं रूपं परिच्छेत्तुं इयत्तयावधारितुमपरि
च्छेद्यं विरिंचिर्ब्रह्मा ऽध अधस्ताच्च हरिर्विष्णुर्यत्नात् सर्वप्रयत्नेन यावद्द्रष्टुं शक्तौ तावद्यातो गतो ऽनन्तं
न परिच्छेत्तुं समर्थौ विस्मयं यत्र स्थूलरूपमप्यपरिच्छेद्यं तत्र दूरे सूक्ष्मरूपपरिच्छेदसंभावना तेन त्व
दनुवृत्तिं विना हरिविरिंच्योः प्रसिद्धमहाप्रभावयोरपि त्वमविज्ञेयः तत्र का वार्त्ता ऽन्येषामिति। व्यति
रेकमुक्त्वान्वयमाह। ततस्तस्मात्स्वयत्नवैफल्यादनन्तरं ताभ्यां हरिविरिंचिभ्यां श्लाघ्य कुरुस्याशपाङ्गी
क्ष्यमान इति चतुर्थी तयोर्ज्ञानायेत्यर्थः कीदृशाभ्यां भक्तिश्रद्धाभरगुरुगृणद्भ्यां भक्तिरत्र कायिकी
सेवा श्रद्धा मानसी सेवा तयोर्भरो ऽतिशयस्तेन गुरुः श्रेष्ठ निरतिशयं यथा भवति तथा गृणद्भ्यां स्तुव रा म:
द्भ्यां वाचिकीसेवां कुर्वद्भ्यां। यद्वा गुरुतरं भवति शिलोच्चयादिस्थानीयान पवनपर्जन्यादिस्थानीये २६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिन्नविक्रियासुपेतिलघुद्रव्यवत्तथाश्रुतिरप्यनिर्गौरववती। शिलोच्चयादिस्थानीयानवनपर्जन्या
दिस्थानीयैर्विघ्नैर्बालयितुं शक्येतिगुरुशब्देनवाच्यं नितम्। एवंरूपे तदैश्वर्ये स्तवश्लोकाभ्यां किमित्या
ह। स्वयं तस्थस्वयमेव नतु तयोः प्रयत्नेन तस्थे आत्मानं प्रकाशयतिस्म। अतएव तदैश्वर्यमितिक
र्तृपदं दृष्टव्यम्। प्रकाशनार्थे [illegible] प्रकाशनस्थेयाख्ययोः श्चेत्यात्मनेपदम्। यद्वा। गृणाख्यामितिकर्तरि
तृतीया। तस्थौ। स्थितं निवृत्तिमतिभावप्रत्ययः ततस्तयोर्निवृत्तावपि। किं तत्रानुवृत्तिर्नफलति। अ
पितु फलत्येवेत्यर्थः यस्मादेवं तस्मात्। हरिविरिंचिभ्यामपि त्वदनुवृत्त्यैवल्लब्धं साक्षात्कृतः कावार्ता
न्येषामिति अन्वयः उक्तः एवं त्वदनुवृत्तिरेव सर्वं फलति। अन्वयव्यतिरेकाभ्यां दृढीकृतम्॥ हरिपक्षे
तु गिरौ गोवर्द्धनाख्ये शेते गोपीरमयन्निति गिरिशः श्रीकृष्णः अथवा गिरिमरण्डं रंडपति तन्नूकरोतिस्मी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मः २७ रोदंमथनेनेति गिरिशः योजनिकापूर्ववत्। हरिः सर्पः शेषविरिंचिविशेषाभ्यामपि त्वत्कृपयैव त्वं श्रा
न्त इति पूर्ववत् सर्वम्। अज्ञानित्वेतिक्वचित्पाठः सनत्संप्रदायिकः तथाचान्यत्रोक्तम्। नोर्द्ध्वं गम्यः स
रसिजभुवो नाप्यधः शार्ङ्गपाणेरासीदन्तस्तव वहुतनवहुः स्तंभमूर्त्त्या स्थितस्येति॥ १० ॥ ॥
अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्। शिरःप
रवितवं द्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेः त्रिपुरहर विस्फूर्जितमिदम्॥ ११ ॥ ॥
अथ वलिरावणयोरसुरयोरपि भगवदनुग्रहं दर्शयन् स्तौति। अयत्नादिति। हे त्रिपुरहर स्थिरा
या निश्चलायास्त्वद्भक्तेस्तवसेवाया विस्फूर्जितमिदम्। प्रभावोयं किं विशिष्टाया भक्तेः शिरःपद्म पूमः २७
श्रेणीरचितचरणांभोरुहबलेः शिरांस्येव पद्मानि अर्थाद्रावणस्य तेषां श्रेणी पंक्तिस्तया रचितः कल्पितः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चरणांभोरुहयोः पादपद्मयोर्वलिरुपहारो यस्यासौ तथा। रावणो नहि नवभिर्निजशिरोभिः स्वह
स्तकृतैः शंभोरुपहारः कृतः। इति पुराणप्रसिद्धम्। किं तद्विस्फूर्जितमित्याह। यद्दशास्यो रावणः बाहू
न्विंशतिभुजान्। कीदृशान्। रणाय युद्धाय कण्डूयति खर्जुरयति स्पृहेति यावत्। तया परवशान्।
तदधीनान् अभृत धृतवान्। रणकण्डूर्हि रणेनैव निवर्तते। रणासंपत्त्या च सर्वदा तत्कण्डूरेव तज्ज
न्ये स्थितिभावः तर्हि रणं संपाद्य किमिति न तत्कण्डूः न निवर्तयत। तत्र प्रतिमल्लाभावादित्याह॥
त्रिभुवनं त्रैलोक्यं अवैरव्यतिकरं न विद्यते वैरस्य विरोधस्य व्यतिकरः कारणं दर्पादि यत्र तत्तथा आ
पाद्य संपाद्य त्रैलोक्यवर्तिनो वीरानिन्द्रादीन् स्वदासेन नीत्वेत्यर्थः। तदपि अयत्नात् अयत्नेन स्वयमेव रा
वणस्य पराक्रमं ज्ञात्वा सर्वे वीरा दर्पादिकं त्यक्तवन्त इत्यर्थः। तथा चानायासेन निर्जितत्रिजगतोपि राव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भ॰ णास्यभुजानां करारूनैंवशांत्येषः शौर्यातिशयोभगवत् भक्तेरेवप्रभावइत्यर्थः आसाद्येति कश्चित्पा॰
२८ न्तस्यप्राण्येत्यर्थः।हरिपक्षेत्रुत्त्रीणिजाग्रत्स्वप्नसुषुप्त्याख्यानिपुराणिभक्तानांजीवानांस्वसाक्षात्का
रेणाहरतीतित्रिपुरहरोविष्णुःहेत्रिपुरहरमोक्षदायकहेविष्णोदशास्यायतादृशान्वाहूनभूततत
स्वभक्तेरेवपूर्वकृतायाइदानींफलरूपेणपरिणाममानायाः अतएवस्थिरायाअनेककल्पव्यवधा
नेपियावत्फलपर्य्यंतंस्थायिन्यास्तवसेवायाविस्फूर्जितमिदम्।नान्यस्यप्रभावोयमित्यर्थः त्वदी
यवैकुण्ठपुरद्वारपालस्यपार्षदप्रवरस्यब्रह्मशापव्याजेनत्वदिच्छयैवासुरयोनिमनुभवतोपिरा
वणस्यत्वद्भक्तिप्रभावादेवनिरतिशयंपौरुषमित्यर्थः तथाबलेर्वैरोचनेस्त्वद्भक्तेर्विस्फूर्जितमिदं रामः २८
यागशालायांत्वदागमनतच्चरणस्पर्शादिरूपतत्सर्वंसंसूचयन्संबोधयति।हेशिरःपद्मश्रेणीरचि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वच्चरणांभोरुह। अत्रापि बलेरिति संबध्यते। बलेः शिर एव पद्मश्रेणीपममस्यीति। अणिकापादविक्षे
पभूमिं त्वस्यारचितमर्पितं च चरणांभोरुहं येन। स तथा। योगपद्मपीठे हि भगवच्चरणारविंदं तिष्ठ
ती ति शास्त्रप्रसिद्धेः। भगवच्चरणारविंदाधारत्वेन बलेः शिरोऽपि पद्मपीठत्वेन निरूपितम्। शिरःशब्द
स्य नित्यसापेक्षत्वादत्रसापेक्षसमासो न दोषाय देवदत्तस्य गुरुकुलमितिवत्। बलिना खलु भवा
वद्वामनावतारप्रार्थनया पदत्रयमितां भूमिं देयेति। प्रतिज्ञातम्। तत्र पदद्वयेनैव सर्वस्मिन्जग
ति भगवता क्रांते स्वसत्यपालनाय तृतीयपदभूमिस्थाने स्वशिर एव बलिना दत्तम्। तच्च भगवता
स्वपादांबुजेनावष्टब्धमिति पुराणप्रसिद्धम्। न ह्येतादृशः प्रसादो ब्रह्मादिभिरपि लब्धोऽस्ति तस्माद्ब
लिकृतायास्त्वत्सत्कारैव प्रभावोऽयमित्यर्थः॥ ११॥ ॥ अनुष्ठस्त्वत्सेवासमधिगतसारं भु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰ जवनं बलात् कैलासेपि नदंधिवसतौ विक्रमयत्तः॥ अलम्यापातालेप्यलसचलितांगुष्ठशिरसिप
२९ तिष्ठात्वय्यासीद्ध्रुवमुपचितोमुसतिरवलः॥ १२॥ ॥ एवं बलिरावणयोर्भक्तिवशादनुग्रहं
प्रदर्श्यतयोरेवदर्प्पवशान्निग्रहंप्रदर्शयन्नाहौ॥ इति। अमुष्येति। हेत्रिपुरहर अमुष्यपूर्वश्लोकोक्तराव
णस्यप्रतिष्ठास्थितिः त्वयिअलसचलितांगुष्ठशिरसिसतिपाताले ऽप्यलभ्या ऽऽसीत्॥ अलसंमंदं
यथास्यात्तथाचलितंकंपितंअंगुष्ठाग्रंयेनसतथातस्मिन्। चरितमितिह्रस्वत्वंच कंपतेः चलते
र्भित्वानुशासनात्। तथाचतवांगुष्ठकंपनमात्रेणैवतस्यवीराभिमानिनोअधःप्रवेशो ऽभवदयप्र
तीकारआसीदित्यर्थः। अमुष्यकिंकुर्वतः त्वदधिवसतौकैलासेनववमंदिरेस्फटिकगिरावपिभुजवनं एम॰
भुजवृंदंविंशतिसंख्याकंबलाद्विक्रमयतः अतिशौर्य्यस्यव्यापारान् यतः इदमुतथाप्यलंकापानेष्यामि। २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यभिप्रायेणाभुजन्नेषांकुर्वतइत्यर्थः। कीदृशं भुजवनम्। त्वत्सेवासमधिगतसारम्। तवसेवयासम
धिगतं प्राप्तं सारं बलं यस्य। तत्तथा। त्वत्प्रसादादेव तद्बलमासाद्य त्वद्गृहमुन्मादयतीत्यहो कृतघ्नता
मौरवेत्यभिप्रायः एवं हि पुराणेषु प्रसिद्धं भवत्प्रसादादासादितबलेन रावणेन स्वबलपरीक्षार्थं
भगवन्निवासस्यापि कैलासस्य उत्पाटनमारब्धम्। ततस्त्वपार्वत्याभीतया प्रार्थितो भगवान् कैलासे
स्याधोगमनार्थमंगुष्ठमात्रं शनैर्व्यापारयामास। तावन्मात्रेणैव सीणबलो रावणः पातालं प्रविवे
श। पुनस्त्वत्करुणया भगवता समुद्धृत इत्यादि। ननु भगवत्प्रसादाल्लब्धवरो रावणः। कथं भगवन्तं
तदानीमेव विस्मृतवानित्यत आहाध्रुवं निश्चितं उपचितः समृद्धः सन्। खलः कृतघ्नः सुखितः कृतं
विस्मरति सोपच्चयहेतुमपि न गणयतीत्यर्थः। हरिपक्षेतु। हे कैलासे। केलिः क्रीडा सैव प्रयोजनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म: ३० सेतिकैलः कैलासिः स्वर्गो यस्य स कैलासिः इच्छामात्रेण निर्जितसर्वशत्रोरपि श्रीरार्थमेव नंदकधा
रणमित्यर्थः अमुष्य वलेस्त्वदधिवसतो त्वन्निवासे तव स्वत्वास्पदीभूते ऽपि त्रैलोक्ये वलात् मदीय
मिदं त्रैलोक्यमिति स्वत्वाभिमानाद्भुजवनं हस्तोदकं विक्रमयतः मम स्वत्वत्यागपूर्वकं एतस्य प्रतिग
हीतुः स्वत्वमुत्पादयामीत्यभिप्रायेण भगवतः पाणावुदकं प्रयच्छतः कीदृशं भुजवनं त्वत्सेवासम
धिगतसारं त्वत्सेवया समधिगतसारे सौभाग्यविशेषो येन तत्तथा तव पाणिपसंबंधेनातितरां
शोभनमुदकमित्यर्थः तथा च सर्वजगन्निवासस्य तव स्वत्वास्पदीभूतं यत्तत्स्वकीयमिति मत्वानु
ष्पं ददतो महानेव वलेरपराधः त्वया तु परमकारुणिकेन प्रतिज्ञातविक्रमत्रयमितभूमिदानेपि राम: ३०
तस्याः सामर्थ्यमायायतस्य ममतानिवृत्तये योग्य एव दण्डः कृत इत्याह ॥ त्वयि अलसवलितांगुरः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरसि सति तस्य प्रतिष्ठा स्थितिः पाताले ऽप्यलभ्यासीत्। का वार्ता स्वर्गमर्त्ययोः। अथवा पाताले विद्यमा
नस्यापि बलेरिंद्रादिभिरलभ्या प्रतिष्ठा कीर्तिरासीत्। तत्र सर्वदा भगवतः सन्निहितत्वादित्यर्थः॥ अल
संसलिरंचलितः कंपितः अंगुष्ठः शिरसि अर्थाद्बलेर्येन तस्मिन् तथा तृतीयविक्रमभूम्यर्थं बलिना शि
रसि प्रसादिते तत्र च त्वदीयपादांगुष्ठसंबंधमात्रेणैव तस्य पातालप्रवेशोक्त इत्यर्थः। ध्रुवमुपचित
इत्याद्यर्थान्तरन्यासः पूर्ववत् अथवा यत्नोयमसुरावलिरुपचितः सन्नसुख्यति अतो मोहं निहन्तुं नयेः
पचितः कर्तव्य इति भगवतोभिप्रायवर्णनम्। यस्याहमनुगृह्णामीति भगवद्वचनात्॥ १२॥ ॥
यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः॥ न तच्चित्रं तस्मि
न्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥ १३॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म. पूर्वंत्र भगवद्विषये समुन्नतयोर्बलिरावणयोरत्यंतमवनतिर्दर्शिता। अधुना तत्रावनतयोरिंद्रबाऽ
२१ णयोरत्यन्तमुन्नतिं दर्शयन् हरिहरौ स्तौति। यदृद्धिमिति। सुत्राम्णा इन्द्रस्य ऋद्धिं संपत्तिं परमोच्चैः सती
मपि अधश्चक्रे अधः कृतवान् वाणो बलिसुतः कीदृशः परिजनविधेयत्रिभुवनः परिजनो दासः तद्वद्वि
धेयं वश्यं त्रिभुवनं यस्य परिजनानामपि वश्यं त्रिभुवनं यस्येति वा। स तथोच्चैः सतीमपि यदधश्चक्रे त
दन्यत्र चित्रमपि तस्मिन्वाणे न चित्रं नाश्चर्य्यं कीदृशे त्वच्चरणयोर्वरिवसितरि नमस्कर्त्तरि इंद्रसंपं
नैरधःकरणं च त्वन्नमस्कारस्य नपयाप्तं फलं किं त्वेकदेशमात्रमित्याह न कस्या इति। त्वयि विषये शि
रसोऽवनतिर्नमस्क्रिया सा कस्यै उन्नत्यै न भवति अपितु सर्वामेवोन्नतिं मोक्षपर्य्यन्तां जनयितुं स शम्भः
मर्था भवत्येवेत्यर्थः। अवनतिरप्युन्नतिहेतुरित्यतिशयोक्तिसंकीर्णोयमर्थान्तरन्यासः। सर्वोत्कृष्टत २१

मचिंत्यमहिमत्वं च भगवतः सूचयतीति भावः। हरिपक्षे तु हे परमवरद सुत्राम्ण इंद्रस्य बाणःश्राए
कोपि ऋद्धिं संपत्तिं उच्चैरधोपि सतीं त्रिभुवनव्यापिनीं चक्रे कृतवान् यत्तत्तस्मिन् सुत्राम्णि न चित्र
मित्यादि पूर्ववत्। त्वत्प्रसादादेव सर्वान् सुरानेकेनापि बाणेन जित्वा त्रिभुवनराज्यं प्राप्तवानिन्द्र
इत्यर्थः अत्र बाण इति शास्त्रमात्रोपलक्षणं कीदृशो बाणः परिजनवद्विधेयमापन्नं त्रिभुवनं यस्मा
त्स तथा शेषं पूर्ववत्॥ १३॥ ॥ अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्यासी
द्यस्त्रिनयन विषं संहृतवतः॥ स कल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोपि श्लाघ्यो भुव
नभयभंगव्यसनिनः॥ १४॥ ॥ अधुना कालकूटप्रलयजलधौ। संहारं दर्शयन् शंकरना
रायणौ स्तौति। अकाण्डेति। हे त्रिनयन विषं समुद्रमथनोद्भूतं कालकूटाख्यं गरलं संहृतवतः पीतवत

म·
३२ स्तवकण्ठेयःकल्माषकालिमाभासीत्।सकालिमातवकण्ठेश्रियंशोभांनकुरुतेऽपितुकुरुतए
वःननुभगवान्निर्विशेषदर्शीमहदनर्थहेतुविषंकिमितिपीतवानित्यतआहः।अकाण्डेऽसमयेब्र
ह्माण्डक्षयोमहाप्रलयोविषाग्निवेगात्संभावितस्तस्माच्चकिताभीतादेवासुराइन्द्रबलिप्रभृतयस्ते
षुकृपादयातयाविधेयस्यवश्यस्यान्यस्यत्रत्राणेसामर्थ्यंनास्तीतिविश्वत्राणायविषंपीतवानि
त्यर्थः।ननुविषविकारःकल्माषःकथंकण्ठेशोभांतनोतीत्यतआह।अहोइत्यादि।अहोआश्चर्यम्·
भुवनभयभंगव्यसनिनःपरमेश्वरस्यविकारोऽपिश्लाघ्यःप्रशंसनीयः।भुवनस्यभयंत्रासस्तस्यभं·
गोनिरन्वयनाशस्तेनव्यसनेनसर्वमन्यद्विहाययक्रियक्रियमाणत्वात्॥व्यसनमस्यास्तीतितथातत रामः
स्यतेनजगदुपकृतिकृतंदूषणमप्यनिभूषणमेवेत्यर्थः।हेत्रिपरसेतु।हेत्रिनयननयतःत्रयाणांलोका ३२

णांलोकानांनयनवत्सर्वावभासक। तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः। दिवीवचक्षुराततमिति
श्रुतेः अकारेऽकालेब्रह्मणःक्षयोमहाप्रलयःदैनंदिनप्रलयःजलपूरावेगात्संभावितस्तस्माच्च
कितास्तस्मायेदेवाःसुराःस्वायंभुवमनुप्रभृतयस्तद्विषयकृपावशीकृपीतस्यतवं विषंजलंविषं
स्वरंविषंजलंमित्यादिकोषात्। तच्चप्रलयकालीनयज्ञवाराहरूपेणावगाह्यपसीकृत्यसंहृतवतः
शोषितवतःपंकव्यामिश्रणेनयःकल्माषोमलिनिमाआसीत्सकल्माषःस्तोतृभिर्वर्ण्यमानोऽ
र्थात्स्तोतॄणांकरेऽश्रियंशोभांनकुरुतेऽपितुकरुतएव। अर्थान्तरन्यासःपूर्ववत्॥ १४ ॥ ॥
असिद्धार्थानैवक्वचिदपिसदेवासुरनरेनिवर्तन्तेनित्यंजगतिजयिनोयस्यविशिखाः॥ सपश्यन्त्री
शत्वामितरसुरसाधारणंसमंस्मरःस्मर्तव्यात्मानाहंवशिष्णुपथ्यःपरिभवः॥ १५॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म·
२२ अथकामस्यजननिधनेदर्शयन्‌ःहरिहरौस्तौति।असिद्धार्थाइतिहेईश।यस्यस्मरस्यविशिखावाणाः
ःसदेवासुरनरेजगतिदेवासुरनरादिसहितेत्रैलोक्येउत्सृष्टाःक्वचिदपिअसिद्धार्थाअकृतकार्या
ननिवर्त्ततेःपितुसिद्धार्थानित्यंजपिनएवभवंति।अपिनइतिस्मरस्यवाविशेषणाम्।नित्यंजयशी
लस्येत्यर्थः।सएतादृशपौरुषवानपिस्मरःयथान्येदेवाममजय्यास्तथायमपीतीतरदेवतुल्यंत्वां
पश्यन्स्मर्त्तव्यात्मास्मृतंस्मर्त्तव्यःस्मरणीयएवात्माशरीरंयस्यसतथानष्टइत्यर्थः।पश्यन्नितिहेतौ(
शतृप्रत्ययः।लक्षणहेत्वोर्वशात्तुस्मरणात्।तदेतत्स्यस्यन्नृपिर्वामदेवप्रतिपेदेशनिवत्।तेनइतरदे
वसाधारणत्वेनत्वद्दर्शनमेवाव्यवधानेनविनाशहेतुःकावार्त्ताप्यरिभवादेरित्यर्थः।तत्रकेसुत्सन्त्या रामः
यमाह।नहीत्यादिहियस्मात्शिशुर्जितंद्रियेषुअन्येष्वपिपरिभवतिरस्कारःपथ्याहितोनभवति।स्तना ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्मायैवसंपद्यतइतियावत्किंपुनःपरमवशिनावरेपरमेश्वरेत्वयित्यर्थःहरिपक्षेतु।हेईशहन्तरु
रसर्वविलक्षणादेवपूर्वस्मात्व्यात्मासृतोपिस्मरःकामस्त्वांप्रपन्नभूज्जातःत्वत्सकाशाज्जातइ
त्यर्थःपितैवखलुपुत्रंजातमात्रमवलोकयति।अतःपुत्रोपितरमवलोकयतीतिप्रपन्नभूरित्य
नेनजन्यजनकभावोलभ्यतेःकथंजातःसाधारणानवतुल्यरूपंयथास्यात्।आत्मवैपुत्रनामासीति
स्मृतेः।तत्किंसर्व[illegible]नमतत्तुल्यरूपस्तथाचनतस्यप्रतिमाअस्तितस्यनाममहद्यशः।नतत्स
मश्चाभ्यधिकश्चदृश्यतेइत्यादिश्रुतिविरोधइत्याशंक्यवैलक्षण्यमाह।नहीत्यादि।वशिषुजितेंद्रि
येषु।हियस्मात्तस्मात्नयष्यःनहितःतत्रहेतुःपरिभवत्यनर्थ-योजयतीतिपरिभवःकामसर्वे
षांसंसारबंधहेतुःपरमेश्वरस्तुसर्वेषांसंसारबंधस्यात्यंतोच्छेदहेतुरितिमहदेववैलक्षण्यमित्यर्थः।अ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म. सिद्धार्थो इत्यादि पूर्ववत्॥ १५॥ ॥महीपाद्याताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुज
२४ परिघरुग्णग्रहगणम्॥ मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वा
मैव विभुता॥ १६॥ ॥अथ जगद्रक्षणार्थं नर्तनावतरणे दर्शयन् हरिहरौ स्तौति मही
पादाघातादिति। हे ईश जगद्रक्षायै त्वं नटसि नृत्यसि संध्यायां जगंति जिघांसंतं वरलब्धतत्काल
बलं महाराक्षसं निजताण्डवेन मोहयसि। अर्थः त्वं तु जगतां रक्षायै नृत्यसि जगंति तत्ताण्डवेन
संशयितान्येव भवंति। तथाहि महीत्यादि तव चरणाघातेन सहसा संशयपदं संकटं मही व्रजति॥
तथा विष्णोः पदं अंतरिक्षं भ्राम्यद्भुजपरिघरुग्णग्रहगणं भुजा एव परिघा अतिसुवृत्तपीवरदृढ रामः
दीर्घत्वात् तैर्भ्राम्यद्भिः रुग्णाः पीडिताः ग्रहगणा नक्षत्रसमूहा यत्र तत्तथा संशयपदं व्रजतीत्य २४

र्थः तथा द्यौः स्वर्लोकः अनिभृता असंवृताः याज्ञराताभिस्माडितं तरङ्गां तदेकोपस्याः सा तथा भ्रुकुर्दौ
स्थं दुःस्थत्वं याति। एवं क्रमेणाज्ञणाणामपि लोकानां संशयो दर्शितः ननु सोऽसर्वज्ञोऽप्यपायमपर्या
लोचयन्नेवं किमित्येवं विधेत्ताराः देवप्रवृत्तन इत्यत आहः नन्वित्यादिना ननु अहो विभुना परममह
त्ताप्रभुतेति यावत्। वामैव प्रतिकल्लैव। अनुकूलमाचरत्यपि किंचित्प्रतिकूलमवश्यं करोती
त्येवशब्दार्थः। इह पते हि स्वल्पकोपि राजनि स्वदेश रक्षणायसेनया सह संचरति स्वदेशो यन्नवः
किमुत तादृशो महेश्वरे इत्यर्थः हरिपक्षे तु। हे ईश त्वं जगद्रक्षायै नरसिं नरवदाचरसि। नरशब्दा
साचारार्थे क्विप्प्रत्ययलोपेन रमीति रूपम्। मत्स्यादिभूमिकां भजसीत्यर्थः। कस्यामवस्थायां ज
गद्रक्षणार्थमवतरणमित्युच्यते। महीपाद्यादिति। महीं पातीति महीपो राजा तस्माद्दायाता त्सा

म.
३५

महीसहस्रासमकालमेव। संज्ञायपदं व्रजन्ति। आसमंतान्‌ यातो नाशो ऽस्मादिति आयातो हिंस्रतथाच
यदैव हिंस्रस्य राज्यं तदैव संकटं व्रजन्तीत्यर्थः तथा विष्णोः पदमधिष्ठानम्। यत्र भगवान्‌ विष्णुः स्ववि
भूतिभिः सह पूज्यते तद्विष्णोपदं देवयजनाख्यं यज्ञशालादि। तत्‌ कीदृशं आस्यन्निर्मुंजरूपपरिधै
मुंजस्थैः परिधैर्वा रुग्णो भग्नग्रहगणाः सोमपात्रसमूहो यत्र तत्तथा यागादिशुभकर्माणि यदाधं
स्यं तदित्यर्थः। तथा यौ रौरव्यं याति॥ अनिभृता जटाः पाषण्डव्रतचिह्नभूतास्ताभिराताडितं स्वभा
वमिव गमितं तद्रंगुणपदं सत्यलोकाख्यं यस्याः सा तथा। पाषण्डिभिर्हि वैकुण्ठलोको पि नांगी
क्रियते किं पुनरिन्द्रादिलोक इत्यर्थः। यदा चैवं तदा त्वं नरवदाचरसीत्यर्थः। तथा च भगवद्वचनं गी
ताम्। यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति॥ राम.
३५

भागवते चायमर्थो लयेष्वपि सतां न हरेः कथास्युः पाषण्डिनो द्विजजना वृषला नृदेवाः। स्वाहा स्वधा
वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगान्त इति। ननु इच्छामात्रेणैव जग
द्रक्षितुं समर्थोऽपि किमर्थं मत्स्यादिरूपैः क्लिश्यतीत्यत आह। ननित्यादि। ननु निश्चितं विभुता विभ
वत्यसंपन्नतेति यावत्। त्वामेव वक्रेव सत्यपि अञ्जोप्रकारे वक्रेणैव प्रकारेण स्वसंपत्तिं सफ
लयितुं संपन्नं कार्य्यं करोतीत्यर्थः। तेनाश्वविधमैश्वर्य्यमात्मीयं दर्शयन् भक्तानामविध्याना
यतानि तानि श्रवणमनोहराणि चरितानि तेन तेन रूपेण विधत्ते भगवानिति भावः॥१८॥
॥ ॥वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः
शिरसि ते॥ जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म· ॥१७॥ ॥अथगंगाया उद्धरणाधारेणोद्दर्शयन्हरिहरौ स्तौति। वियद्व्यापीति। हेईश्वर अनेनैवलिं
३६ गेनतवदिव्यंदिविभवंसर्वदेवनियन्तृवपुःशरीरंधृतमहिमसर्वेभ्योमहत्तरम् उन्नेयंऊहनी
यंतववपुषःसर्वमहत्तरत्वंएतावतापिनिश्चेतुंशक्यंकिमितिप्रमाणांतरमात्रापेक्षितव्यमित्ये
वकारार्थःइतिशब्दःप्रकारार्थःएवंप्रकारेणलिंगेनेत्यर्थःतमेवप्रकारंदर्शयति।वियदित्यादिवि
यदाकाशंव्याप्नोतिआच्छादयतीतितथातारागणेननक्षत्रवृंदेनस्वान्तःपातिनागुणिताशुभ्र
त्वादिगुणास्वजातीयत्वाद्वृद्धिंनीताफेनोद्गमरुचिर्यस्यसतथायःएतादृशोवारांप्रवाहःसतवशि
रसिपृषतसूक्ष्मःपृषताद्विन्दोरपिलघुरल्पतरःपृषतलघुःसइवदृष्टःआलोकितस्तेनतुवा गणः
रांप्रवाहेणजलधिवलयंजगद्वीपाकारंकृतम्जलधीनांवृंदंजगत्भूलोकोद्वीपाकारंजंबूद्वीपा ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिसप्तकरूपं यत्र तत्तथा ॥ अगस्त्येन सप्तसमुद्रेषु पीतेषु पुनर्भगीरथानीतगंगाप्रवाहेणैव तेषां
पूरणं जातमिति पुराणप्रसिद्धम् ॥ तथा च योजनलक्षशिखवशिरसि विन्दोरप्यल्पोदस्थः स एवात्र
कियान् मंदाकिनी नाम वियद्व्याप्यास्ते कियान् भागीरथी गंगेति च भूर्लोके सप्तसमुद्रानापूर्या
स्ते कियांस्तु भोगवतीसंज्ञया पाताले समभिव्याप्यास्ते। इत्यनेन तत्वादिव्यवपुषो महत्त्वमनुमीय
त इत्यर्थः। हरिपक्षे तु। तारागणगौरगुणिताः फेणा यस्याः सा तारागणगुणितफेना गंगा तस्या उत्त
मेरुङ्गवेक्ष्चिः शोभा यस्य स तथा शिरसि सर्वलोकानां शिरःस्थाने। येन ब्रह्मलोके वलिछलने छी
त्रचरणांगुष्ठनिर्मितब्रह्माण्डविवराद्गतो गंगोत्पत्तिहेतुर्विपश्चायको यो वारां प्रवाहः स तेन त्व
या एष लघुरिष्ट विंदोरपि लघुर्यथा स्यात्तथोपलक्ष्य इत्यर्थः। अनेनैव लिंगेन तत्वादिव्यं वपुर्वलिछ

म. न्ननार्थं दिवि आकाशे आविर्भावितं त्रैविक्रमं रूपं ध्रुतमहिमोन्नेयं शेषं पूर्ववत्॥ १७॥ ॥
२७ रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो रथांगे चंद्रार्कौ रथचरणपाणिः शर इति॥ दिधक्षोस्ते कोयं
त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः॥ १८॥ ॥
अथ लंकात्रिपुरदाहे दर्शयन् हरिहरौ स्तौति। रथः क्षोणीति। हे ईश त्रिपुरत्रिणं दिधक्षोस्तव को
यमाडम्बरविधिः त्रयाणां पुराणां समाहारस्त्रिपुरं तदेव तृणं अनायासेन नाश्यत्वात्। तद्दग्धुमि
च्छोस्तव कोयं महत्प्रयोजनमुद्दिश्येव संभ्रमरचना न हि लौकिका अपि न स्वच्छयेऽकार्यं परिगृह्ण
न्ति। अतस्तवाप्यल्पप्रयोजनेन महान् प्रयासः उचित इत्यर्थः आडंबरविधिमेव दर्शयति। क्षोणी शुभः
पृथ्वी रथरूपेण परिणता शतधृतिर्ब्रह्मा सारथिः अगेंद्रः पर्वतश्रेष्ठो मेरुः कोदंडः सोमसूर्यौ चक्र २७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्रे। रथचरणं चक्रं तद्युक्तपाणिर्विष्णुः शरो बाणः चतुर्थे बाकोस्य तोप्यथाशब्दः सर्वत्र वाक्यभेदा
प्रयोजनीयः इति शब्दप्रकारार्थः त्रिभुवनमपीच्छामात्रेण संहर्तस्यैवं प्रकारेण सामग्रीसंपा
दनमाडंबरमात्रमित्यर्थः। एवमाक्षिप्य परिहारमाह। विधेयैरिति। खलु निश्चितं प्रभोरीशस्य
उद्भयः संकल्पाः विशेषाः परतंत्रा न भवंति। अपितु स्वतंत्रा एव। ताः कीदृश्यः। विधेयैः स्वाधीनैः
पदार्थैः क्रीडन्त्यः खेलंत्यः नहि क्रिडायां प्रयोजनाद्यपेक्षास्ति। तस्माद्विचित्राणि वस्तूनि स्वाधी
नतया क्रीडाधनीकृत्य क्रीडतस्तव सर्वाणि कार्याणि स्वेच्छामात्रेण कर्तुं क्षमस्य लोकवेदनीयमा
नधीनवृत्तेः न किंचिदप्यनुचितमित्यर्थः हरिपक्षेतु। त्रीणि त्रिकूटगिरिशिखराणि पुराणि आश्र
योयस्येति त्रिपुरं लंकापुरं तद्देवतृणां तद्दग्धुमिच्छोस्तव कोश्रीरामरूपेण सग्रुग्रीवस्य समुद्रबंध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म. नादित्राडंबरन्निधिः रथक्षोणीत्यादिरूपकम्। क्षोणी वरथः शतधृतिर्विनियन्ता अगेंद्रो धनुः सूर्य्ये
२८ चंद्रा विविरथचक्रे रथचरणपाणिर्विशरः स्वतुल्यवीर्य्याबाराइत्यर्थः क्षोणापादितुल्यरथाद्युपादा
नमेतादृशात्स्वल्पप्रयोजनायापेक्षितमुचितं न भवतीत्यर्थः शेषं पूर्ववत्॥ १८ ॥ ॥
हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्। गतो भक्त्यु
द्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्॥ १९ ॥ ॥
अथेन्द्र उपेंद्रयोर्भक्तिं तत्फलं च दर्शयन्नाह हरिरहो स्तौति हारिरिति हे त्रिपुरहर हरिर्विष्णुः तव पा
दयोः साहस्रं सहस्रपरिमाणं कमलानां पद्मानां च बलिमुपहारं सहस्रकमलात्मकं बलिमित्यर्थः एमः
आधाय समर्प्य तस्मिन् कमलसहस्रबलौ एकोने सति एकेन कमलेन न्यूने सति परीक्षार्थं त्वया गो(२८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पित्तेनहीनेत्तेतिनियमभंगोमाभूदितितत्पूरणार्थंतदाकमलांतरमलभमानोनीजमात्मी
यंनेत्रकमलमेवउद्धरत्।उत्पाटितवान्।यदेवंस्वनेत्रोत्पाटनरूपंभजनंअसौभक्तुद्रेकः
भक्तेःसेवायाअत्यन्तप्रकर्षःचक्रवपुषासुदर्शनरूपेणपरिणतिंगतस्त्रयाणांलोकानांरक्षायै
जागर्तिपरिपालनार्थंसावधानएववर्ततइत्यर्थः।सोरपुराणेपुराजालंधरनाम्नोसुरस्यवधार्थं
यत्भूम्यांचरणांकितेनचक्रंमहेशेनसृष्टंतद्देवासुरसंग्रामेसुरवधार्थंविष्णुभक्त्यासंतुष्टेनम
हेशेनविष्णवेदत्तवानेवमाख्यापिकापुराणप्रसिद्धातथाचैवंमहात्म्यलमस्तीतिभावःहरिप
क्षेतु।त्रिपुरहरेतिप्राग्व्याख्यातम्।हरिरिंडः तवपादयोःसाहस्रंकमलबलिमाधाय।कीदृशं
नेत्रकमलंनेत्राण्येवकमलानियस्मिन्सतथानेत्रसहस्रात्मककमलसहस्रबलिमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म· युगपन्नेत्रसहस्रव्यापारेणत्वच्चरणयोर्दर्शनरूपमाराधनंकृतेत्यर्थः।आराधनप्रयोजनमाह॥
३२ निजमात्मानंएकःसहायांतरशून्यमनेनास्मिन्एतल्लोकविलक्षणेस्वर्गेलोकेउद्हरत।उद्धृतवा
न्।स्वर्लोकाधिपतिमात्मानंकृतवानित्यर्थः यंनिजपुरुजैर्युगपन्नेत्रसहस्रेणत्वच्चरणावलोक
नेनत्वतप्रवणत्वं असौभक्तावेकः चक्रवपुषा चक्रं सैन्यंऐरावतोच्चैःश्रवप्रभृतिनऽयेणपरिणतः
समुद्रमथनेनलक्ष्मीपीयूषादिप्रादुर्भावात्रयाणांलोकानांरक्षायैजागर्तीतिपूर्ववत्॥ १९ ॥
कृतौसुप्तेजाग्रत्वमसिफलयोगेक्रतुमतां कर्मप्रधानंफलतिपुरुषाराधनमृते॥ अनस्त्वांसे
प्रेत्सयक्रतुपुफलदानप्रतिभुवं कृतौश्रद्धांवद्धाकृतपरिकरःकर्मसुजनः॥ २० ॥ ॥ एमः ३२
एवंपूर्वश्लोकेषुपरमेश्वराराधनादेवसर्वपुरुषार्थप्राप्तिरन्वयव्यतिरेकाभ्यामुक्ताःनकेचिन्नमी·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मांसकंमन्याः परमेश्वरान्निरपेक्षात्कर्मेज्ञंनिनापूर्वो देवस्तु भाशुभफलप्राप्तिरित्याहुस्तान्निराकुर्वं
स्तौति। कृताविति। त्रिपुरहरेति संबोधनं पूर्वश्लोकादनुषज्यते। कृतौ यागादिकर्मणि आशुतरवि
नाशिस्वभावतानुष्ठितेऽल्पीनेकारणो सूक्ष्मरूपतां प्राप्तेध्वस्ते सति क्रतुमतां यागादिकर्मकारिणां का
लांतरदेशांतरभाविनत्तत्फलसंबंधार्थं तन्निमित्तं त्वं जाग्रदसि प्रबुद्धस्त्वं वर्तसे। वर्तमानेवि
हितेन शत्रानाजागरणस्य सर्वदास्तित्वमुच्यते। तेन सर्वदैवावहितो सीत्यर्थः। ननु लिङादिपदवाच्यं
वा क्रियायाः स्वर्गादिसाधनत्वान्यथानुपपत्त्या वा कल्प्यमपूर्वमेव फलयोगाय जागर्ति किमीश्वरेणे
त्यत आह। कृतिप्रध्वस्तं विनष्टं कर्म पुरुषस्याचेतनस्य फलदानुराराधनं विनाक फलतिनकापी
त्यर्थः। न हि लोके कुत्रापि विनष्टस्य कर्मणः पूर्वव्यापारफलजनकत्वं दृष्टं लोकानुसारिणी च वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म· पिकल्पनाल्लोकवेदाधिकरणन्यायावत्। चेतनस्य तु राज्ञादेराराधितस्य विनैवापूर्वं सेवादिकर्मफल
४० जनकत्वं दृश्यते। तत्र लोकदृष्टप्रकारेणैव वैदिककर्मणामपि फलजनकत्वसंभवे न लोकविरुद्धा
पूर्वफलदातृत्वकल्पनावकाशः। अपूर्वं हि लोकसिद्धरणांतरनिरपेक्षं वा स्वर्गादिफलं जनयेत्तत्
सापेक्षं वा। आद्ये तत्तत्फलोपभोगयोग्यदेहेंद्रियादिकमपि नापेक्षेत। न चैतदिष्टं सर्वस्यापि सु
खदुःखादेः शरीरसंयुक्तात्ममनोयोगादिदृष्टकारणजन्यत्वाभ्युपगमात्। द्वितीये तु लोकसिद्ध
देहेंद्रियाद्यपेक्षावदीश्वरापेक्षापि नियता। लोके तथादर्शनात्। तस्मात् श्रुतिन्यायसिद्धेश्वरपदा
र्थैश्वर्यबाधाद्वरमपूर्वपदार्थस्यानैरपेक्ष्यधर्ममात्रबाधकल्पनं फलमत उपपत्तेरिति न्यायात्। इ एम:
दं चापूर्वमभ्युपेत्य तत्तत्सापेक्ष्यत्वमीश्वरस्योक्तम्। वस्तुतस्तु नापूर्वं किंच नश्यमानमस्ति निरू ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दीनामिष्टाद्युपायतावाचकत्वात् । तदन्यथानुपपत्तेरिति न्यायात् । इदं चापूर्वमभ्युपेत्य तत्सापेक्ष्य
त्वमीश्वरस्योक्तम् । वस्तुतस्तु नापूर्वं किंचन प्रमाणमस्ति । लिङादीनामिष्टाद्युपायतावाचकत्वात् ।
तदन्यथानुपपत्तेश्चेत्यश्रुतिन्यायसहस्रसिद्धपरमेश्वरगौवोपक्षयान्नापूर्वसिद्धिः अपूर्वं तत्तत्फल
दातृत्वं च भवद्भिः कल्प्यमस्माभिस्तु केवलमीश्वरः कल्प्यः तस्य फलदातृत्वादिकं तु चेतनत्वाद्राज्ञा
दिवल्लोकसिद्धमेव सर्वज्ञत्वेन तत्तत्कर्मानुरूपफलदातृत्वान्न वैषम्यनैर्घृण्यादिदोषप्रसंगः
यत एवं त्वमेव सर्वकर्मफलदाता अतस्त्वां कतृ पुष्यौत स्मार्तकर्मसु । कालान्तरफलसाधनेषु
फलदानं प्रति भुवं फलदानायलग्नकमिव संप्रेक्ष्य संग्यकश्रुतिस्मृतिन्यायैः प्रकर्षेणानिश्चि
त्य कर्मफलदातृत्वस्य सद्भावप्रतिपादकायाः श्रुतेराह तस्य वा अक्षरस्य प्रशासने गार्गि ददतो म

म॰ नुष्याः प्रसंशंति। यजमानं देवा दर्वीं पितरो ऽन्वायत्ताः कर्माध्यक्षः सर्वभूताधिवासः एष ह्येव साधु
४१ कर्म कारयति तं यमुन्निनीषते। एष उ ~ ववामनी। रित्यादिकायां श्रुतां वह्वाऽर्थवादत्वप्रयुक्तस्वार्था
प्रामाण्याशंकानिरासेन लोकसिद्धदृढतरन्यायानुगृहीततया देवताधिकरणन्यायेन स्वार्थे प्रामा
ण्यं निश्चित्य जनः श्रुतिस्मृतिविहितकर्माधिकारी कर्मसु कृतपरिकरउद्यमो येन स तथाकृता
रंभो भवतीत्यर्थः। प्रतिभूसादृश्यं चैतावन्मात्रे विवक्षितम्। यथा कश्चिदुत्तमर्णः प्रमाणनिश्चि
तदीर्घकालावस्थानं स्वधनार्पणसमर्थं कंचित्प्रतिभुवं निरूप्याधमर्णाय पत्नायितेम्, ते वा एतस्मा
देवकुशलिनः प्रतिभुवः सकाशात् स्वधनं प्राप्स्यामीत्यभिप्रायेणायस्मै कस्मैचिदधमर्णाय रामः
ऋणं प्रयच्छति तद्वदधमर्णस्थानीयेकर्मणि प्रलीने पिपरमेश्वरादेवप्रतिभूवस्थानीयादेतत् ४१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलं प्राप्स्यामीत्यभिप्रायेणोत्तमर्णस्थानीयो यजमानो निःशंकमेव कर्मानुतिष्ठतीति भावः ह
रिपक्षे त्वेवं सर्वं पूर्ववत्॥ यत्रास्तु जनः साधुजनः कर्मश्रौतस्मृतिविहितं अकृतवान्। कीदृशः सु
जनः परिकरः परिकरः सर्वतः कं सुखं राति ददातीति तथा सर्वेषां सुखकरोऽहिंसक इत्यर्थः इदप
रिकर इति क्वचित्पाठः तस्य द्रष्टारं भ इत्यर्थः। भयं चन सांप्रदायिकः॥ २०॥ ॥
त्रियाद्दक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामस्त्वर्थिष्वंशरणाद सदस्याः सुरगणाः॥ क्र
तुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो कुर्वंकतं श्रद्धा विधुरमभिचाराय हि मखाः॥ २१॥ ॥
एवं भगवत्प्रसादेन क्रतुफलप्राप्तिमुक्त्वा विहितानां शुभफलजनकत्वानुपपत्त्या धर्माख्यमपू
र्वं व्यापारत्वेन कल्पनीयमिति पक्षो निराकृतः संप्रति विहिताकरणनिषिद्धकरणयोरशुभफलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म ४२

भगवत्प्रसादासाध्यत्वात्तदर्थमवश्यमधर्मोत्थमपूर्वंकल्पनीयमितिशंकायांराज्ञाज्ञात्वंघनाटे
रिवानर्थफलंदृष्टद्वारेणोवभविष्यतीत्यभिप्रायेणभगवतःप्रसादेनक्रतुफलप्राप्तिमनर्थप्रा
प्तिंचदर्शयंस्तौतिक्रियादक्षइतिदक्षोदक्षनामाप्रजापतिःस्वयंक्रियास्वनुष्ठेयासुदक्षःप्रवीणः
यज्ञविद्याकुशलइत्यर्थःएतेनविद्वत्त्वमधिकारिविशेषणमुक्तंतथातनुभृतांशरीरिणामधीशः
स्वामीप्रजापतित्वात्तेनसामर्थ्यमधिकारिविशेषणमुक्तंएतादृशःक्रतुपतिर्यजमानःतथाऋषी
णांत्रिकालदर्शिनांभृगुप्रभृतीनामार्त्विज्यंऋत्विक्त्वम्अध्वर्य्यादिस्वरूपतातथासुरगणाःब्र
ह्मादयोदेवगणाःसदस्याःसभ्याःउपद्रष्टारःएतादृशसर्वसामग्रीसंपन्नादपित्वत्तःपरमेश्वराद
प्रसन्नात्क्रतोर्यज्ञस्यभ्रेषःभ्रंशोजातःतन्नःकीदृशात्क्रतुफलविधानव्यसनिनःक्रतोर्यज्ञस्यफ एम: ४२

लं स्वर्गादि तस्य विधानं निष्पादनं तेन व्यसनी तदेकनिष्ठ तस्मात् क्रतुफलदातृत्वभावोपि त्वमाज्ञो
ल्लंघनात् क्रतुध्वंशहेतुतां नीत इत्यर्थः एतदेव द्रढयन्नाह ध्रुवमिति। ध्रुवं निश्चितं क्रतुफलदातारं
परमेश्वरे विषये श्रद्धाविधुरं भक्तिरहितं यथानुष्ठिता मखाः यागाः कर्तुर्यजमानस्याभिचाराय
नाशायैव भवंतीत्यर्थः॥२१॥ पक्षे तु तनुभृतामधीशः क्रतुपतिः तनुं स्वशरीरमेव बिभर्ति केवलं पु
ष्णंतीति तनुभृतो दैत्याः ते हि सुरनरपितृभ्यो न प्रयच्छंति सर्वं हिंसया स्वशरीरमेव केवलं पुष्ण
न्तीति तेषामधीशो राजा वलिः क्रतुपतिर्यजमानः अथवा तनून् क्षीणान् विभ्रति पुष्णंतीति तनुभृ
तो वदान्यास्तेषामधीशो दातृवीराग्रगण्यो वलिः कीदृशः क्रियादक्षो दक्षः उत्कृष्टानि भक्षाणि दु
र्याणि यस्य स उदक्षः क्रियादक्षश्चासावुदक्षश्चेति स तथा। तथा सुरगणाः सुरेषु देवेषु गण्यंत इति सुर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म. गणाःदेवतुल्याःपुरुषाःसरस्वात्म्रज्ञाविधुरत्वंचभगवदनुग्रहीतेंद्रादीदेवगणैःमहर्षिरोधात्तव
४३ भक्तद्रोहाद्भगवतःस्वद्रोहादप्यधिकःशेषंपूर्ववत्॥ २१ ॥ ॥प्रजानाथंनाथप्रसभमभि
कंस्वांदुहितरंगतंरोहिद्भूतांरिरमयिषुमृष्यस्यवपुषा॥ धनुःपाणेर्यातंदिवमपिसपत्राकृतमम
सुंत्रसन्तंतेद्यापित्यजतिनमृगव्याधरभसः॥ २२॥ ॥अथब्रह्ममारीचयोर्मृगरूपयोर्व
धंदर्शयन्हरिहरौस्तौति। प्रजानाथमितिहेनाथनियामक। तेनवपरमेश्वरस्यधनुःपाणेर्धृत
पिनाकस्यमृगव्याधरभसःमृगान्विध्यतीतिमृगव्याधोलुब्धकःतस्येवरवसःउत्साहातिरे
कोमृगव्याधरभसःशरएवतथारूपितःसचार्द्रानक्षत्ररूपेणपरिणतःपुराणप्रसिद्धःअ रम: ४३
सुंप्रजानाथंब्रह्माणंस्वांस्वर्गंयातंप्राप्तमपिनक्षत्रमध्येमृगशिरोनक्षत्ररूपेणपरिणतमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तया सपत्राकृतम्। सहपत्रेणागाशरीरप्रवेशपातिव्यथां नीतः सपत्राकृतः तादृशमिवात्मानं मन्यमा
नं रूपकमेतत्। शरस्यार्द्धोनक्षत्ररूपेण संनिधानमात्रेंनद्युताऽन्तीमितिद्रष्टव्यम्॥ अथवा शरेण
ताडितएवतुमृगरुद्रस्यसक्रोधोत्साहविशेषस्यवार्द्धोनक्षत्ररूपेणपरिणतइतिपुराणान्तरप्र
सिद्धाऽद्रष्टव्यम्॥ अएवत्वमत्तविभ्रमतंअद्यापिनत्यजतिइदानीमपिधनुष्पाणिमेवत्वांसर्वदा
दर्शयतीत्यर्थः तस्यैतादृशदशाहेतामाह। स्वांआत्मीयांदुहितरंपुत्रींरोहिद्भूतांत्वज्जयामृगी
भूतांऋष्यस्यमृगस्यवपुषाशरीरेणरिरमयिषुरमयितुमिच्छुःयंस्वल्लज्जयामृगीभूतानर्हम
पिमृगरूपेणैनानाभजिघ्रामीतिव्याघ्रामृगशरीरेणैवप्रसभंहठेनानिच्छन्तीमपितांगतंरत्यर्थं
प्रासन्नंतस्यपरमवशिनोपिस्वमर्यादातिक्रमेकारणंवदन्निविशिनष्टि। अभिकं। कामुकंकामेनाभि

म· ४४ भूत्वा तस्य मर्यादोल्लंघिनामित्यर्थः। एवं हि पुराणेषु प्रसिद्धं ब्रह्मा स्वदुहितरं संध्यामतिरूपिणीमा
लोक्य कामवशो भूत्वा तामुपगन्तुमुद्यतः सा चायं पिता भूत्वा मामुपगच्छतीति लज्जया मृगीरूपाव
भूव। ततस्तां तथा दृष्ट्वा ब्रह्मापि मृगरूपं दधार। तच्च दृष्ट्वा त्रिजगन्नियन्ता श्रीमहादेवेनायं प्रजाना
थोऽधर्मप्रवर्तको भूत्वाप्येतादृशं जुगुप्सितमाचरतीति महत्यपराधे दण्डनीयो मयेति पिनाक
मारुह्य शरः प्रक्षिप्तः ततः स ब्रह्मातिव्रीडितश्च सन् मृगशिरोनक्षत्ररूपोऽभवद्भगवतः श्रीरुद्र
स्य शरोऽपि आर्द्रानक्षत्ररूपो भूत्वा तस्य पश्चाद्भागे स्थितः तथा चार्द्रा मृगशिरसोः सर्वदा सन्निहि
तत्वाद्यापि न त्यजतीत्युपक्रम। हरिपक्षे तु हे नाथ रोहिद्भूतां गतं प्रजानाथं दिवं यातमपि धनु राम: ४४
व्याणोत्सव मृगव्याधरूपः सोऽद्यापि न त्यजति। रोहितो हरिणः सकाशाद्भवतीति रोहिद्भूः हरिण

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शावकः तस्य भावो शेहिश्नूतां गतं हरिणशावकत्वं प्राप्तमित्यर्थः।प्रजाः प्राणिनो नाथतिउपतापय
तीति प्रजानाथो राक्षसः स च प्रकृतो मारीचाख्यः तं किमर्थं तस्य मृगरूपधारणमित्याह।प्रसभमभि
कीरं मयिपुंप्रकृशशोप्यो रिपुत्रासभायस्य सप्रसभस्तंनाद्दृष्टा मितः कानिशिरांसि पस्यसोभिको
दसग्रीवस्तस्सीताहरणोपायेन कौउसितु मिच्छुंतथा स्वां दुहितरं मंत्र्यो निजां कंन्यां सीतां ग्रस्यस्यवपु
षा विचित्रमृगशरीरेण रमयितुमिच्छुं विचित्रमृगरूपं मां दृष्ट्वासीना स्त्री स्वभावादतिमुग्धा मत्त्वसं
ग्रहार्थं श्रीरामं प्रेष्यति अतो रामे वहुदूरं मया प्रसारिते लक्ष्मणो वहुदेशार्थं गते एकाकिनी सीतां ह
वणः सुखेन हरिष्यतीत्यभिप्रायेणाद्भुतचित्रमृगरूपमित्यर्थः अत एव तवचाणेन सपद्याकृतत्वा
द्दिवं परलोकं यातं मृतमित्यर्थः।असुं मृतमपि त्रसन्तमयापि मृगव्याधरभसो न त्यजतीत्युत्प्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म· ५५ स्वारूपोथ निःशेषं पूर्ववत्॥ २२॥ ॥त्वल्लावण्याशां माधृतधनुषमह्नाय तृणवत्पुरः सुष्टं दृ
ष्ट्वा पुरमथन पुष्पायुधमपि॥ यदि स्त्रैणं देवी यमनिरतदेहार्द्धघटनादवैति त्वामत्रावतवरदमु
ग्धा युवतयः॥ २३॥ ॥परमवशिनावणावपि श्रीराम महादेवौ लक्ष्मीपार्वत्युनुकं
पयाह्रैणमिवात्मानं दर्शयन्तौ इति प्रतिपादयं स्तौति। त्वल्लावण्येति। हे पुरमथन यमनिरत
यमनियमाद्यष्टांगयोगपरायण अनेन जितेन्द्रियत्वमुक्तं पुष्पायुधं कामं त्वया तृणवद्ह्नाय
सुष्टं तृणमिव शीघ्रं दग्धं पुरः साक्षाद्देवन व्यवधानेन दृष्ट्वा निर्दोषवास्त्रूषज्ञानविधौ लम्पकी दृ
शं पुष्पायुधं त्वस्याः पार्वत्या यल्लावण्यं सौंदर्यातिशय स्तद्विषया आशंसा परमयोगिनमपि श्रीरुद्रं रामः
अस्याः सौंदर्यातिशयेन वशीकरिष्यामीति या प्रत्याशा तया निमित्तभूतया धृतधनुष्येन तत्तया ५५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेनस्वलावण्यातिशयस्यापि श्रीरुद्रविषयेन किंचित्करत्वमुक्तं तथा चैवं स्वलावण्यवैयर्थ्यं
पुष्पायुधस्य तथावद्दाहं च स्वयं साक्षात्कृत्यापि देवी पार्वती इयं चिरकालं मामुद्दिश्य तपः कृत
वतीति विहस्य दुःखमाप्नोतीति करुणामात्रेण देहार्द्धप्रदानात्तया स्वशरीरार्द्धे ऽवस्थापनाद्व
तोर्द्धं मवीजानात् यदि त्वां सर्वयोगिनां वरं स्वैरं यथ्ययमदधीनो न भवेत् कथं मां स्वशरीरार्द्धे स्था
पयेदिति भ्रांत्या स्त्रीसहजं यद्यवेति। विशेषादर्शनात् कल्पयति तद्वायुक्तमेव तस्याभयुक्त
स्यापि युक्तत्वे हेतुमाह। वलेत्यादि। हे वरद भीतउल्लभं स्वदेहार्द्धमपि दत्तमिति यो गंपवोघनमभ्याव
तअहो युवत्यस्य स्तरणपः मुग्धा अतत्त्वज्ञाः स्वभावत एवेति शेषः तथा च सहजानां युवतिविभ
षणानां प्रधानम्। मौग्ध्यं मौर्ख्यमनुकुर्वन्त्याः स्वरूपतश्चितिरूपाया अपि देव्या मिथ्याज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म. ५८ नेयुक्तमित्यर्थः। हा पस्येतु हे अर्द्धघरनादेव घरनायाअर्द्धअर्द्धघरनाअर्द्धपिप्पलीति वनात्। तस्याद
वः वनवह्निरारुक इति यावत्। सीतारूपायालक्ष्म्याराम रूपेणोचितात् संयोगात् स्वेच्छयार्द्धसंभो
गं दत्वा अर्द्धं विप्रलंभं दत्तवान् सीतार्थः। सा पूर्वोक्तो कोक्रादेवी सीतारूपा लक्ष्मीः कीदृशी यमनि
रतदेहाः स्यन्तपतिव्रता तथा पुरमथन पुष्पाः परस्यशरीरस्य मथनानि पीडकानि पुष्पाणि यस्याः
सा तथा पुष्पाणामपि स्पर्शासहा। अतिसुकुमारांगीत्यर्थः त्वां श्रीरामरूपं यदि सेवेत एतिप्रत्येति तदर्द्धे
त्यादि पूर्ववत्। त्वां कीदृशं स्वलावण्यांशं स्वकीयं लावण्यसंज्ञशौर्यादिगुणाकृतं सौंदर्यं तस्मिन्ना
शायस्य सल्लावण्याशरम। सीताया अनुहरणे स्वस्यशौर्यादिप्राप्तिश्रीर्गच्छेदिति स्वकीर्तिरक्षार्थि राम: ५८
नमित्यर्थः। अत एव [illegible] तथ नृपंसजा। कृतकोदराः इदमेकं अमवी जानतरमाहा। अहायतत्रणावनतपुरःस्तु

ष्ठं दृष्ट्वा शीघ्रमेव तत्तस्य वपुरोल्लंकायां पुष्पं राहं भावेनः तथा अपुष्पं दृष्ट्वा पद्ममपि दृष्ट्वा भापुधृशाददस्यशृ
शृपुङ्क्षं चानुशासनात् तथा च स्वकीर्तिरक्षार्थमत्यन्तपुनितिपुतायां स्वदेव्याः कारूणेन न क्लेशविमो
चनार्थं सञ्जीकृतकोदण्डतां भर्ङ्घरनादवमभिअर्पयं पदिमदर्शीनो न भवेन्नदा कथमेतां रशङ्क
रकर्माणिमामुद्दिश्यकुर्यादितिभ्रमेणाज्ञीसन्तमिव कल्पयतीत्यर्थः॥ २३॥ ॥
श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपिनृकरोटीपरिकरः॥ अमंगल्यं शी
लं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि॥ २४॥ ॥ अथ स्वयममंग
लशीलतयाक्रीडन्नपि भक्तानां मंगलमेव ददासि स्वयममंगलशीलानामपि भक्तानां त्वमेव मं
गलमसीति च वदन् शंकरनारायणौ स्तौति। श्मशानेष्विति। हे स्मरहर हे वरद तव अखिलमपि शी

म. ४८ त्वंसर्वमपिचरितंएवंकारेणअमंगल्यंमंगल्यविपरीतंभवतुनामकिंनस्तेननिरूपितेनेत्यर्थःतथा
पित्वयमंगल्यशीलोपिस्मर्तृणांतवस्मरणाकर्तृणांत्वंपरमंमंगल्नमेवासिनिरतिशयंकल्याणमे
वभवसि।तेनामंगलशीलोयंरुद्रोनमंगलकामैःसेवनीयइतिअसंपरिहत्यमनोवाक्कायप्रणि
धानैःसर्वदासर्वैःसेवनीयोसीत्यर्थः।एवंपदद्वयेनविचित्रममंगल्यशील्नमेवदर्शयति।श्मशानेष्वित्या
दि।श्मशानेषुसमंतात्केलिःपीशिताशना।प्रेताःसहायाःशवदाहभस्मांगरागसाधनस्र।मनु
ष्यशिरोऽस्थिसमूहोमाला।अपिशब्दादन्यरण्यार्द्रचर्मादि।हारिपर्श्चेतु।हेवरदतवस्मर्तृणाममंग
ल्यंशीलंभवतु।नामतथापितेषांत्वमेवपरमंमंगलमसीत्यर्थःतथाचगीतासु।अपिचेत्सुदुरा म्नः ४८
चारोभजतेमामनन्यभाक्।साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसइति।अथवानवनामस्मर्तृणा

मितियोऽयंतामममात्रंस्मरतामपिपरमंमंगलमसितांस्मरतान्तुविस्तुवाच्यमित्यर्थः कीदृशंनामम
खिलंनखिलंफलरहितंखिलंनच्छिन्नम्।सर्वत्रसर्वदासफलमित्यर्थः।अत्यंतपापित्वेनप्रसिद्धा
नामजामिलादीनामपित्वन्नाममात्रस्यपुत्रनामत्वेनमरणाव्यभयाप्रशिथिलकरणत्वेनचमद
सुच्चारणेपिसर्वपापक्षयद्वारापरमपुरुषार्थप्राप्तिश्रवणात्।अमंगलंशीलमेवदर्शयति।श्मशा
नेष्वित्यादिरूपकेनात्यंतनिरस्कृतवाच्योयंनिरर्थलक्षणामूलःश्ववशयनतुल्येषुसर्वदारोदनप्र
धानेषुगृहेषुभार्ईषत्क्रीडअल्पकालंवैषयिकतुच्छसुखप्राप्तिरित्यर्थःतथास्मरहरपिशाचाःस
हचराःस्मरणंस्मरःशास्त्रीयविवेकसंहरन्तीतिस्मरहराःपिशाचतुल्याःपुत्रभार्यादयःस्मरहरांश्च
तेपिशाचाश्चेतिकर्मधारयःयथापिशाचाःस्वावेशेनज्ञानलोपंकृत्वापुरुषमनर्थेयोजयंतितथापु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म.
४८ त्र भार्यादयोपि तादृशास्तु वस्तुगत्या वैराग्योपि सहैव चरंतीति न क्षणमपि त्यजन्तीति सहचरास्तथापि
ताभस्मतुल्यः यआलेपः देहस्य विरागजन्त पूयादिपूर्णत्वेनातिजुगुप्सितत्वात्तदालेपनस्याप्यतिजुगु
प्सितत्वम्। तथा मनुष्यशिरोस्थिसमूहतुल्याः मालापिशाचतुल्या भार्यादिविनोदहेतुत्वात्। अपिश
ब्दाइत्यदपि सर्वं चरितं विषसंगिनाममंगलमेव। एतादृशानपि चेत्तांस्त्वन्नाम स्मरंति तदा त्वमेव ते
षां मंगलरूपेणाविर्भवसीत्याहो ते भक्तवात्सल्यमित्यर्थः हरपक्षेप्येवं वा योजनीयम्॥ २४॥ ॥
मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः॥ यदालो
क्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥ २५॥ ॥ म्नः ४८
ज्ञतीतः पंथानमित्यत्र हि पदार्थत्रयमुपन्यस्तं तत्र कतिविधगुणा इत्यनेन सगुणमैश्वर्यं। कस्य विषय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इत्यनेनाद्वितीयंब्रह्मस्वरूपंपदेत्वंवाचीनइत्यनेनलीलाविग्रहविहारादितत्राजन्मानोलोकाइत्य
त्रसामान्यतःपरमेश्वरसत्भावंदृढीकृत्य।तवैश्वर्यंयत्नाद्यइपरिइत्यादिनासगुणमैश्वर्यं-लीला
विग्रहंविहारादिकंचवर्णितंसंप्रत्यद्वितीयब्रह्मस्वरूपंवक्तव्यमवशिष्यतेतदनभिधानेपूर्वोक्तस्य
सर्वस्यापितु[illegible]करणंतुल्यत्वप्रसंगात्।निर्गुणब्रह्मस्वरूपस्यैवसर्वश्रुतिस्मृतितात्पर्यविषयत्वे
नसत्यत्वात्सर्वस्यापिप्रपंचस्यस्वप्नप्रपंचवत्मिथ्यात्वात्।तस्मान्निर्गुणब्रह्मनिरूपणार्थंतद्ग्रंथा
रंभः।तत्रपूर्वश्लोकेत्वंपरमंमंगलमसीत्युक्तंतत्रैवमाशंक्यतेमंगलंहिसुखम्।नचेश्वरस्यसुखरूपत्वं
संभवतिसुखस्यजन्यत्वात्गुणत्वाच्च।ईश्वरस्यनित्यत्वाद्द्रव्यत्वाच्चनित्यज्ञानेच्छाप्रयत्नवानीश्वरोनसु
खरूपोनापिसुखाश्रयइतितार्किकाः।क्लेशकर्मविपाकाशयैरपरामृष्टःपुरुषविशेषईश्वरश्चितिरूपोपि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म.
४९

नसुखरूपइतिपातंजलाः तद्देवं नाद्वितीयईश्वरोनापिसुखरूपइत्याशंक्य तस्याद्वितीयपरमानन्दरू
पत्वेविद्वदनुभवरूपंप्रमाणंवदन् स्तौति। मनः प्रत्यगिति हे वरद यत् किमपि तत्त्वम्। इदंतया
वक्तुमशक्यंसत्यज्ञानानंतानंदात्मकंवस्तु आलोक्य वेदांतवाक्यजन्यायाः खंडाकारवृत्त्याः परोक्षीकृ
त्ययमिनः यमनियमशमदमादिसाधनसंपन्नाः परमहंसाः अंतराह्लादं वा सुखविलक्षणं निर
तिशयसुखंपूर्वंद्वियमाणमेव दधतिधारयंति। ननूत्पादयल्लिंगिनत्वात्। ततस्त्वं किल भवान्। किले
तिप्रसिद्धौ। सत्यज्ञानानंतानंदात्मकत्वेनैव स्फूर्तिप्रसिद्धो भवान्। ननता किंकाशुक्र एकारः अत
स्त्वं कथं परमंमंगलं न भवसीति वाक्यशेषः। तत्राह्लादस्य निरतिशयत्वं दर्शयितुं दृष्टांतमाह। अमृ राम्नः
तमये ह्रदे निमज्जेन। यस्य खलु लेशमात्रमपि स्मृत्वा सकलसंतापोपशमनेन सुखिता भवंति कि ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुखकत्वं तस्य निमज्जनरूपसर्वांगी। संयोगेनेति कारणातिशयात् कार्यस्याप्यतिशयः सूचितः। यद्यपि
ब्रह्मणोन्नस्य सर्वातिशयिनो न कोपि दृष्टांतोस्ति। तथापि तत्सामान्येनापि लोकानां बुद्धिदार्ढ्यायेदमु
क्तम्। तादृशब्रह्मानंदानुभवस्य साधारणं कारणमाह। मनइत्ति चित्ते हृदयांबुजे मनः संकल्पविक
ल्पात्मकं भवबाधाय निरुध्य निस्पृस्यं कृत्वेति यावत्। कीदृशं मनः प्रत्यक्। चक्षुरादीन्द्रियद्वारा बहि
र्विषयप्रवृत्तिप्रतिकूलतयाऽन्तर्मुखतयैवांचतीति प्रत्यक्। कीदृशाय मनः सविधं सप्रकारं यथा
स्यात्तथा आत्तमरुतः शास्त्रोक्तमार्गेण कृतप्राणायामाइत्यर्थः अत्र सविधमित्यनेन, यमनियमा
सनानि सूच्यन्ते। आत्तमरुत्त इत्यनेन चतुर्थः कुंभकः। विषयेभ्य इंद्रियाणां निवर्तनरूपः प्रत्याहारः
प्रत्यकपदेन सूचितः। चित्ते इत्यनेन। संवं धारणोक्ता अवध्ययेत्यनेन ध्यानसमाधी। तदुक्तं भगव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰ तापतंजलिना। देशसंबंधश्चित्तस्य धारणा। तत्र प्रत्ययैकतानता ध्यानम्। तदेवार्थमात्रनिर्भासं स्व
५० रूपशून्यमिव समाधिरिति। चित्तस्य वशीकरणार्थं मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशु
द्धाज्ञाख्यचक्राणामन्यतमे देशेऽवस्थापनं धारणोच्यते। प्रत्ययस्यैकतानता एकविषयप्रवाहः
स च द्विविधः विच्छिद्य विच्छिद्य जायमानः संततश्चेति। तावुभौ क्रमेण ध्यानसमाधी भवतः एतेनाष्टां
गयोगपरिपाको ब्रह्मसाक्षात्कारहेतुर्निदिध्यासनरूपत्वेनोक्तः। एवं ब्रह्मानंदानुभवस्य कारणमु
क्त्वा। कार्यमाह। प्रहृष्यद्रोमाणः प्रहर्षेणोत्पुलकितांगाः तथा प्रमदसलिलोत्संगितदृशः हर्षाश्रु
पूर्णनेत्राः। एतदुभयं चयमिनामानन्दानुभवानुमाने लिंगमुक्तम्। अत्र प्रशब्देन उत्संगितशब्देन गुरुः
च लौकिकसुखापेक्षयातिशयविशेषो व्यज्यते। यस्य च तत्त्वस्यालोकनमात्रेणाप्यन्यस्य परमा ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्लादं बिभर्ति ततः। स्वयं परमाह्लादं भवतीति किमु वक्तव्यमित्युक्तं। विज्ञानमानन्दं ब्रह्म आनन्दो ब्र
ह्मेति व्यजानात्। एष एव परमानंदः यो वै भूमा तत् सुखं। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आ
नन्दो न स्यादित्याद्याः श्रुतयश्चास्मिन्नर्थे प्रमाणत्वेन द्रष्टव्याः हरिपक्षेप्येवम्॥ २५॥ ॥
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च॥ परिच्छि
न्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि॥ २६॥ ॥
एवमद्वितीये ब्रह्मणि परमानंदरूपे सर्वात्मके विद्वदनुभवरूपं प्रत्यक्षं प्रमाणमुक्तम्। अ
धुना तस्यैवाद्वितीयत्वं तर्केणापि साधयं स्तौति। त्वमर्क इति हे वरद परिणताः परिपक्वबुद्धयः
त्वयि विषये एवं परिच्छिन्नां एवं रूपेण परिच्छिन्नत्वेन त्वां प्रतिपादयंती गिरं वाचं बिभ्रतु धारयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

म. ५१ तुनामः केनरूपेणापरिछिंनामित्याह। त्वमर्क इत्यादिना। अत्र सर्वत्र त्वंशब्दो वाक्यालंकारार्थः उशब्दो
ऽवधारणे त्वमित्यनेन संबध्यते। चशब्दः समुच्चये इतिशब्दः समाप्तौ। अर्कादयः प्रसिद्धाः आत्मा क्षेत्र
ज्ञो यजमानरूपः एते चाष्टौष्टौ रुद्रमूर्तिनागमप्रसिद्धाः वक्ष्यमाणभवादिनामाष्टकसहिताः स्व
तुर्थ्यन्तानमोंताश्चाष्टौ मंत्रा भवंति ते गुरूपदेशेन ज्ञातव्याः एतदष्टमूर्तित्वं चान्यत्राप्युक्तं क्षितिहु
तवहक्षेत्रज्ञांभः प्रभंजनचंद्रमस्तपनावियदित्यष्टौ मूर्तिर्नमो भवविभ्रत इति। तेन सर्वात्मक
मपि अर्काद्यष्टमात्रमूर्तिं त्वां वन्तीत्यर्थः अत्रापरिणताः इत्यस्मिन्नर्थे परिणता इति सोपहासं। वि
भ्रतीति लोकुचा नत्रुमतावप्युत्तमतिप्रकाशनात्। तेन सर्वथानुचितमेवैतदित्यर्थः। तर्हि किमुचि गमः ५१
तं ज्ञातात्वयेदमनुचितमित्युच्यते तत्राह। नेत्यादिना। हि यस्मादिह गातितत्तत्वं वस्तु यं न जानीमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्यस्तु त्वं न भवसि त्वत्स्थं न मितियावत्। अत्र स्वस्य प्रमाणकौशल्येनोत्कर्षं ख्यापयितुं विप्र इति व
रुवचनम्। वयं तु त्वद्भिन्नत्वेनैव युष्मा सर्वं जानीम इत्यर्थः एवं च तव सर्वात्मकत्वादस्कौदिविशे
षरूपाभिधाधानं व्यर्थमेव। तथा च श्रुतिः इंद्रिमित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मा
न्। एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः एष उ ह्येव सर्वे देवा इति च। सर्वदेवभेदं
वारयति। न हि सदतिरिक्तं किंचिदुपलभ्यते। सद्रूपश्चात्मा त्वमेवेति तर्केणापि सिद्धमद्वैतम्। न
च सर्वस्य ब्रह्मरूपत्वे घटादिज्ञानरूपत्वात्ततोपि मोक्षप्रसंग इति वाच्यम्। अन्यानुपरक्तचैतन्य
भानस्यैव मोक्षहेतुत्वात् घटादिआकारज्ञानस्य चाविद्यापरिकल्पितान्योपरक्तचैतन्यविषयत्वा
त्। अन्योपरक्तचैतन्यस्य सद्रूपेण चक्षुरादिविषयत्वेप्यन्यानुपरक्तस्य तस्य न वेदान्तवाक्यमात्रविष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म: पत्वव्याघातःननुसर्वस्यसन्मात्रत्वेपिनाद्वैतसिद्धिर्भिन्नानामपिसत्ताजातियोगेनसदाकारबुद्धि
५२ विषयत्वसंभवात्।अन्यथाद्रव्यगुणकर्मादिभेदव्यवहारोनस्यादितिचेन्न।द्रव्यंसत्।गुणःसन्नि
त्यादिप्रतीतेर्द्रव्यत्वादिधर्मविशिष्टैकसन्मात्रधर्मिविषयत्वमेव।नतुद्रव्यादिधर्मिषुभिन्नेषु
सत्ताख्यधर्मविषयत्वम्।धर्मिकल्पनातोधर्मकल्पनायालघुत्वात्।एकस्मिन्सतिचसर्वाभिन्न
मायिकनानाधर्मविशिष्टप्रतीत्युपपत्तेःद्वौचंद्रावित्यत्रेवनपारमार्थिकभेदकल्पनावकाशः
तथाचायंप्रयोगःअयंद्रव्यगुणादिभेदव्यवहारःसर्वभेदानुगताऽज्ञातात्मकैकसद्वस्तुमात्राव
लंबनःभेदव्यवहारत्वात्।द्विचंद्रभेदव्यवहारवत्।इतितस्मान्नचेतनमचेतनमचेतनंवाकिंचि एम:
दपिपरमात्मनोभिन्नमुपपद्यते।सएषइहप्रविष्टःअनेनजीवेनात्मनाऽनुप्रविश्येत्यादिश्रुत्या ५२

स्पष्ट। विकृतस्यैवं जीवरूपेण प्रवेशप्रतिपादनात्। तथा इदं सर्वं यदयमात्मा इत्यादिवाक्यैकोऽन्ववनब्रह्म
घासामान्यवस्यैकप्रलयादिहेतुभिर्मृत्सुवर्णादिदृष्टांतेनाकाशादिप्रपंचस्य ब्रह्मात्मकत्वप्रतिपादना
त् सदेव सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयमिति वचनात् एवाद्वितीयोऽक्रेस्वं च सदाकारप्र
त्यक्षं भेदव्यवहारत्वलिंगाकमनुमानं सर्वात्मकत्वस्य यथानुपपत्तिस्थेति प्रमाणाद्वयमुक्तम्। विस्त
रेण चान्नयुक्तयो वेदांतकल्पलतिकायामनुसंधेयाः तस्मान्न विभ्रम इत्यादिना साम्येवोक्तमद्विती
यत्वं हरिपक्षेतु अकारादिशब्देन तत्तद्वच्छिन्ना देवतात्मान उच्यन्ते स एवासावादित्ये पुरुष एतमे
वाहं ब्रह्मोपास इत्यादिना। ज्ञातश्चैव दृष्टवालाकिनोपदिष्टाः बृहदारण्यके कौषीतकिब्राह्मणे
च प्रसिद्धाः परिच्छिन्नत्वदोषेण ब्रह्मत्वं चैतेषां तत्रैवाजातशत्रुणा प्रतिपादितं स होवाचाजातश

म: त्रुरेवंतुइतितावद्गीतिनैतावताविदितंभवतीत्यादिनाअन्यत्सर्वंसमानम्॥ २८॥ ॥
५२ त्रयींतिस्रोवृत्तीस्त्रिभुवनमथोत्रीनपिसुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति॥तुरीयन्ते
धामध्वनिभिरवरुंधानमणुभिःसमस्तंव्यस्तंत्वांशरणदगृणात्योमितिपदम्॥ २९ ॥ ॥
एवंप्रत्यक्षानुमानार्थापत्तिभिरद्वितीयत्वंपरमेश्वरस्यसर्वात्मकत्वेनप्रसाध्यतदेवागमेनापि
साधयत्स्तौति।अथवाक्रमेणपूर्वश्लोकद्वयेनत्वंपदार्थंतत्पदार्थंचपरिशोध्यानेनश्लोकेना
खण्डवाक्यार्थंवदन्स्तौति।त्रयीमिति।हेशरणद।आर्तानामभयप्रद।ओमितिपदंत्वांसर्वात्मान
मद्वितीयंगृणाति।अवयवशक्त्याचप्रतिपादयति।अतएवोंकारस्यावयवशक्त्यावाच्यत्वेपि म्नः
समुदायशक्त्यापंकजादेरिवपदत्वमुपपन्नं।योगरूढिस्वीकारात्।तदस्वीकारेपिसुप्तिङन्तंपद ५२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिवैयाकरणपरिभाषया पदत्वम्। कृतद्धितसमासाश्चेत्यनेन समासस्यापि प्रातिपदिकसं
ज्ञाना विधानात्सुबन्तत्वमुपपन्नमेव। कीदृशमोमिति पदम्। समस्तम्। अकारोकारास्यप
दत्रयं कर्मधारयसमासनिष्पन्नम्। एतेन समुदायशक्तिरुक्ता। तथा व्यस्तं। भिन्नम्। अकारउ
कारमकार इति स्वतंत्रपदत्रयात्मकमित्यर्थः। एतेनावयवशक्तिरुक्ता। इदं च पदद्वयमभिधे
येपि योज्यम्। तां कीदृशम्। समस्तम्। सर्वात्मका। तथा व्यस्तम्। अध्यात्माधिदैवादिभेदेन भिन्न
तया प्रतीयमानं तथा च व्यस्तमोमिति पदम्। व्यस्तं तां गृणाति समस्तमोमिति पदं समस्तं
तां गृणातीति संबंधः एतदेव दर्शयति त्रयीमित्यादिना त्रयी वेदत्रयं तिस्रो वृत्तयः जाग्रत्स्व
प्नसुषुप्त्याख्याः अंतःकरणस्यावयवस्थाः एतच्च विश्वतैजसप्राज्ञानामप्युपलक्षणम्। त्रिसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰ ५४ वनं भूर्भुवः स्वः एतदपि विराट् हिरण्यगर्भोऽव्याकृतानामुपलक्षणम्। त्रयः सुराः ब्रह्मविष्णुमहे-
श्वराः एतच्च सृष्टिस्थितिलयानामुपलक्षणं एतत्सर्वं अकाराद्यैस्त्रिभिर्वर्णैरभिदधेत्। अभिधा
नत्वा प्रतिपादयेत्। व्यस्तमित्यर्थः एवमत्र ऋग्वेदो जाग्रदवस्था। भूर्लोको ब्रह्मा चेति चतुष्टय
मकारार्थः तथा यजुर्वेदः स्वप्नावस्था भुवर्लोको विष्णुश्चेति चतुष्टयमुकारार्थः तथा सामवेदः
सुषुप्त्यवस्था स्वर्लोको महेश्वरश्चेति। चतुष्टयं मकारार्थः मांडूक्यनृसिंहतापनीयाथर्वशिखादा
वन्यदप्युक्तं गुरूपदेशाज्ज्ञातव्यम्। अतिरहस्यत्वान्नेह सविशेषमुच्यते तस्मात् अध्यात्माधिभू
ताधिदैवाधियज्ञादि यावदन्यच्चोक्तमस्ति। तत्सर्वं मन्त्रोपसंहर्तव्यम्॥ न्यूनतापरिहाराय तथा रमः
च सर्वप्रपंचाकारेणाव्यस्तत्वात् अकारोकारमकारैर्व्यस्तमोमिति पदं अभिदधत। त्वां गृणातीति सं ५४

वंधः तथा तीर्णो विकृतिः सर्वविकारातीतं तुरीयं भवस्यात्रयाभिमानि विलक्षणं तव धाम स्वरू
पमखण्डचैतन्यात्मकं तत्त्वेति षष्ठी राहोः शिर इतिवदुपचारेण अष्टाभिर्द्ध्वनिभिरखण्डंधानं
स्वतउच्चरयितुमशक्यैरर्द्धमात्रायाः प्लुतोच्चारणावशेन निध्याय्यमानैः सूक्ष्मध्वनैरवबोधं कुर्वत्
प्रापयत् । समुदायशक्त्याबोधयदितियावत् । अर्द्धमात्राया एकत्वेपि ध्वनिभिरिति बहुवचनं प्लु
तोच्चारणे चिरकालमनुवृत्तायास्तस्या अनेकध्वनिरूपत्वात् । वक्ष्यमाण । ध्वनेः स्वाणुत्वाणु
तरत्वाणुतमत्वादिकं गुरूपदेशादधिगन्तव्यं । तथा चार्द्धमात्रारूपेण समस्तमोमिति पदं
समुदायशक्त्या सर्वविकारातीतं तुरीयं स्वरूपमभिदधत् समस्तं त्वां गृणातीति संबंधः एवं च
पदार्थाभिधानमुखेन नामखण्डवाक्यार्थसिद्धिरर्था उक्ता तथा हि । स्थूलप्रपंचोपहितं चैतन्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मकारार्थः तत्र स्थूलप्रपंचांशपरित्यागेन केवलचैतन्यमात्रमकारेणलक्ष्यते तथा सूक्ष्मप्र
पंचोपहितं चैतन्यमुकारार्थः सूक्ष्मप्रपंचांशपरित्यागे चैतन्यमात्रं तेन लक्ष्यते। तथा स्थू
लसूक्ष्मप्रपंचद्वयकारणीभूतमायोपहितं चैतन्यं मकारार्थः॥ तादृशमायांशपरित्यागेन चै
तन्यमात्रं तेन लक्ष्यते। तथा स्थूलसूक्ष्मप्रपंचद्वयकारणीभूतमायोपहितं चैतन्यं मकारार्थः
तादृशमायांशपरित्यागेन चैतन्यमात्रं मकारेण लक्ष्यते। तथा स्थूलसूक्ष्मप्रपंचद्वयकारि
णीभूतमायोपहितं चैतन्यं मर्द्धमात्रार्थः। तदुपाधिपरित्यागेनार्द्धमात्रया चैतन्यमात्रं लक्ष्यते।
एवं चतुर्णां सामाधिकरण्यपादभेदबाधे परिपूर्णमद्वितीयं चैतन्यमात्रमेव सर्वद्वैतोपमर्द्देन सि
द्धं भवति॥ लक्षणयापरित्यक्तानामुपाधीनां मायातत्कार्य्यरूपत्वेन मिथ्यात्वात्। स्वरूपबोधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नच स्वरूपाज्ञानात्मकमायां तत्कार्य्यनिवृत्तेर्न पुनरवस्थानप्रसंगः न च चित्तस्य साक्षात्कारानं
तरमपि तदवस्थमुपलभ्यते। त्वण्यादीनां वा वाक्यार्थबोधानुपयोगेऽप्युपासनायामुपयोगात् पृथ
गभिधानं द्रष्टव्यं। तस्मात्सर्वं इतीयमुक्तिः प्रत्यगभिन्नब्रह्मपरा एव वाक्यार्थ इति सिद्धम्। एत
च्च सर्वेषां तत्त्वमस्यादिमहावाक्यानामप्युपलक्षणं तेषामपि प्रत्यगभिन्नपरिपूर्णं इति यद्ब्र
ह्मप्रतिपादकत्वात्। यथा च शब्दादप्यपरोक्षनिर्विकल्पकबोधोत्पत्तिस्तथा प्रपंचितमस्माभिर्वे
दांतकल्पलतिकायामित्युपरम्यते हरिपक्षेप्येवम्॥ २७॥ ॥भवः सर्वो रुद्रः पशुपतिरथो
ग्रः सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम्। अमुष्मिन् प्रत्येकं प्रविचरति देव श्रु
तिरपि प्रियायास्मै धाम्ने प्रविहितनमस्योस्मि भवते॥ २८॥ ॥एवं तावदिति पद्ब्रह्मप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म. तिपादकत्वेन प्रणव उपन्यस्त। एतस्य चार्थानुसंधानं जपश्च समाधिसाधनत्वेन त्वेन पतंजलिना
५८ सूत्रितः। समाधिसिद्धिरीश्वरप्रणिधानाद् इति ईश्वरप्रणिधानाद्वेतिसूत्रांतरम्। तस्य वाचकः प्रण
वस्तज्जपस्तदर्थभावनमिति सूत्राभ्यां प्रणवजपस्य प्रणिधानार्थकत्वेन व्याख्यानात्। श्रुतौ च ए
तदालंबनं श्रेष्ठमेतदालंबनं परमित्येतदालंबनं ज्ञात्वा यो यदिच्छति तस्य तदित्यादिना सर्वप्रय
र्थहेतुत्वमुक्तं। एतस्य चातिदुरूहार्थत्वेन। स्त्रीशूद्रायनर्हत्वेनासाधारणत्वात् सर्वसाधारणानि प्रसि
द्धानि भगवद्वाचकानि पदानि जपार्थत्वेन वदः। स्तौ निभव इति। हे शरणद देव। इदं यदभिधाना
ष्टकं नामाष्टकं अमुष्मिन् अभिधाने एकविषये प्रत्येकमेकैकशः प्रतिनामेति यावत् स्फाति वेदः राम: ५८
प्रविचरति। प्रकर्षेण बोधकतया व्याप्रियत इत्यर्थः। अपिशब्दात् स्मृतिपुराणादिकमपि। अथवाष्ट·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णवइत्यासुभिन्नप्रस्थितिर्प्रविचरतीति योऽस्मा। यस्यापि वचनकारोऽवमन् हि नामत्वेनैतानि समाम्ना
तानि तथापि वक्ष्ये भगवद्विभूतित्वात् तन्नामत्वेपि न भगवन्नामत्वव्यापातः यद्वाऽस्मिन्नामाष्टके
देवानां ब्रह्मादीनां श्रुतिः श्रवणेन्द्रियं प्रविचरति सावधानतया प्रवर्त्तते तेनेपि तन्नामश्रवणोत्सु
काः किं पुनरन्ये इत्यर्थः। किं तन्नामाष्टकमित्याह भगव इत्यादिना। महतां महद्वदेनस हवर्त्त
त इति महमहान्। महादेवः तथैवागमप्रसिद्धः इति शब्दः समाप्त्यर्थः यस्य च नाममात्रमपि स
र्वपुरुषार्थप्रदं स पुनः स्वयं कीदृश इति भक्त्युद्रेकेणा[illegible]णमति। प्रियायेत्यादिना। अस्मै स्वप्रका
शचैतन्यरूपत्वेन सर्वदा परोक्षाय भवते महिम्न आपकीदृशाय धाम्ने सर्वेषां शरणभूताय त्रिड
पायेति वा योग्यमुपचारं किंचिदपि कर्तुमशक्नुवन्नहं केवलं प्रविहितनमस्योऽस्मि। प्रकर्षेणावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰ ५७ दा। मनःकायव्यापारातिशयेन विहितानमस्यानमस्क्रियायेन स तथा केवलं तुभ्यं कृतनमस्कारो
भवामीत्यर्थः। प्रणिहितेति पाठेप्ययमेवार्थः हरिपक्षेप्येवम्। भवादीनां चहरिनामत्वं योगपदवृ-
त्या संभवत्येव। सहस्रनामसु पठितत्वाच्चेति द्रष्टव्यम्॥ अथवा यदिदमभिधानाष्टकं प्रत्येकं
देवश्रुतिरपि देवशब्दोपि प्रविचरति संवद्धो भवति। तथा च भवदेव इत्यादिरूपं तवरहस्यं
नामाष्टकमित्यर्थः। तथा च भवस्य रुद्रस्यापि देव आराध्य इत्यर्थः एवमन्येष्वपि नामसु द्रष्ट-
व्यम्॥ २८॥ ॥नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महि-
ष्ठाय च नमः। नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति सर्वाय च रामः ५७
नमः॥ २९॥ ॥एवं जातभक्त्युद्रेको नमस्कारमेवानुवर्णयन् उरुमहिमत्वेन भगवं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तंस्तौति। नम इति। हे प्रियदव। निर्जनवनविहार। ते तुभ्यं नेदिष्ठाय अत्यन्तनिकटवर्तिने दविष्ठाय
। अत्यंतदूरवर्तिने च नमो नमः। हे स्मरहर कामान्तक क्षोदिष्ठाय सूक्ष्मतराय महिष्ठाय महत्तरा
य च तुभ्यं नमो नमः तथा त्रिनयन त्रिनेत्र वर्षिष्ठाय जति वृद्धतराय। यविष्ठाय युवतमाय च
तुभ्यं नमो नमः। एवं विरुद्धस्वभावस्यान्यबुद्धिभिः स्वरूपनिर्णयासंभवात् सर्वदा नमस्का
र एव करणीय इति प्रदर्शनाय नमः शब्दावृत्तिः तथा च स्मृतिः दूरात्सुदूरे तदिहान्तिके च। अणो
रणीयान्महतो महीयान्। त्वं स्त्री। त्वं पुमानसि। त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वंच
सि त्वं जातो भवसि विश्वतोमुख इत्यादि। तथा किं बहुना सर्वं स्मेर सर्वस्वरूपाय तुभ्यं नमः इदं
सर्वं यदयमात्मेति स्मृतेः न नु तर्हि। सर्वविकाराभिन्नत्वाद्विनाशित्वप्रसंग इत्याशंक्य सर्वस्याध्यस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰ ५९ त्वेनवास्तवतद्भेदाभावात्सर्वबाधाधिष्ठानत्वेनचक्ष्कृतिषुमासमानाधिकरणपव्यपदेशार्हत्वि(
तीयस्यत्रयस्थगेणनविकारगंधोपिसंभाव्यतइत्यभिप्रायेणनमस्कुर्वन्नाहःतदिदमितिसर्वाय
चनमःततपरोक्षंइदमपरोक्षइत्यनेनप्रकारेणनिर्वाच्यंसर्वंयत्ततदिदमितिसर्वंतस्मैवकुर्वी
हावन्यपदार्थप्रधानत्वान्नसर्वनामतातेनसर्वाधिष्ठानभूतायतुभ्यंनमइत्यर्थःहीपक्षेप्य
वंकेवलंसंबोधनत्रयमात्रमन्यथाव्याख्येयम्।प्रियाणिवैषयिकसुखानिवैराग्योद्बोधेनदु
नोतिनाशयतीतिप्रियदवःतथास्मर्यतेऽनेनेतिस्मरोवासनातांहरति–स्वभक्तहृदकेणेति
स्मरहर।तथात्रयाणांलोकानांनयनवत्सर्वार्थावभासकइतिप्रागभिव्याख्यातम्॥२९ एमः ५८
॥ ॥बहलरजसेविश्वोत्पत्तौभवायनमोनमःप्रबलतमसेतत्संहारेहरायनमोन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मः॥ जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः॥ प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥
२०॥ ॥ अधुना पूर्वोक्तं सर्वार्थं संक्षेपेण नमस्कुर्वन्नास्तुतिमुपसंहरति। बहलरजसे इति।
विश्वोत्पत्तौ विश्वउत्पत्तिनिमित्तं बहलं तमःसत्वाभ्यामधिकं रजो यस्य सतस्मै उद्रिक्तरज
से भवत्यस्माज्जगदिति भवो ब्रह्ममूर्तिस्तस्मै तुभ्यं नमो नमः तथा तत्संहारे विश्वसंहारनि
मित्तं प्रबलं सत्वरजसी अभिभूयोद्रिक्तं तमो यस्य तस्मै हरतीति हरो रुद्रमूर्तिस्तस्मै नमो
नमः। तथा जनानां सुखकृते जनानां सुखनिमित्तं कृते शब्दो ऽव्ययं निमित्तवाची सत्वस्यो
द्रिक्तौ उद्रेके रजस्तमोभ्यामाधिक्येस्थिताय न्यर्थात्लभ्यते। सत्वोद्रेक इति वा पाठः अथवा सत्वो
द्रिक्तौ सत्यां जनानां सुखं करोतीति जनसुखकृत् तस्मै यद्वा सुखस्य कृतं करणं भावे क्तः तस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म.
५८ रतस्मिन्निमित्तं। एवं व्याख्याने प्रक्रमभंगदोषो न भवति पूर्वपर्यायद्वये उत्तरपर्याये च समस्य
तन्निमित्तनिर्देशात्। मृडयति सुखयतीति मृडो विश्वमूर्तिस्तस्मै नमः। न तस्यैवाद्रूपत्वात्तत्क्रमसं
गेन पश्चान्निर्देशः। एवं गुणत्रयोपाधिं नत्वा निर्गुणं नमति प्रमहसीपदेसी। प्रकृष्टमायया
नभिभूतं महः ज्योतिर्यत्र तस्मिन् तथा सर्वोत्तमप्रकाशरूपे त्रिगुणशून्ये मोक्षनिमित्तमि
त्यर्थः। शिवाय निस्त्रैगुण्यपमंगलरूपाय शिवमद्वैतं चतुर्थं मन्यन्त इति श्रुतेः। प्रसहसि पदं स्थि
तायेति वा। हरिपक्षेप्येवं। एवं समस्तरूपेणैव भगवंतं स्तुत्वा तस्यौद्धत्यपरिहारं ममत्वे
तावाणीमित्यत्रोपक्रांतमुपसंहरन्नाह। कृशेति हे वरद सर्वाभीष्टदेत्युपसंहारे योग्यसंबोधनम्। मः ५८
तव पादयोर्महाकपुष्पोपहारं भक्तिराधानं। त्वद्विषया रतिः अर्पितवती। यथा पुष्पाणि मधुक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रेभ्यः स्वयं मकरंदं प्रयच्छंति अन्येषामपि दुराकंधमार्गेणापि भ्रमोरमाद्यतितान्येतानि स्तुतिरूपा
णि वाक्यानि भक्तिरसिकेभ्यो भगवन्महात्म्यवर्णनामृतरसं प्रयच्छंति। अन्येषामपि श्रवणमा
र्गेणापि वक्तुस्सामान्यात सुखविशेषमास्वतानि ध्वनयितुं पुष्पत्वेन निरूपितम्॥ तथा च वा
क्यान्येव पुष्पाणि तैरुपहारः पूजार्थं व्यंजलिन्यस्तमित्यर्थः। किं कृत्वा। आधात। इत्यनेन हेतुना
चकितं भीतं स्तुतेर्निवर्तमानं मां अमंदीकृत्य नमनं कृत्वा वल्गात स्तुतौ प्रवर्तेत्यर्थः॥ ३०॥ ॥
कृशपरिणतिचेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः॥ इति चकितम
मन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥ ३१॥ ॥तथा चानाय
त्याप्रवृत्तस्य मम सत्वलितेपि क्षंतव्यमित्यभिप्रायः इति शब्देन सूचितं भयकारणमाह॥ कृशे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.गी.
६०

त्यादीनां। कृशाअल्पापरिणतिः परिपाको यस्य तत्तथा ऽल्पविषयमित्यर्थः। तादृशं मम चेतः चित्तं
ज्ञानं वा तथा क्लेशानाम् अविद्याऽस्मितारागद्वेषाभिनिवेशानां वशंप्रायत्तं सर्वदा रागद्वेषादिदो
षसहस्रकलुषितमित्यर्थः क्लेशेनातिप्रयासेन वश्यं कलुषितमिति वा। तेन त्वद्गुणावर्णने
ऽत्यन्तायोग्यमित्यर्थः। गुणानां सीमा संख्यापरिमाणयोरियत्तानामुल्लंघितुं शीलं यस्याः सा
गुणसीमोल्लंघिनी शश्वदृद्धिः नित्यविभूतिः ते तव तादृशदोषबहुवासनासहस्रकलुषमत्यल्प
विषयं मम मनः क्व। अनन्ता नित्या तव धामा। विभूतिर्वा क्वेति। अत्यन्तासंभावनाममभयहेतु
रित्यर्थः एतदवधारणेन तव भक्तिरेव कारणमिति। भक्तेरत्यन्ताऽसंभावितफलदानेपि सामर्थ्यं रा.म:
दर्शयति। यस्मादेवं तस्मात्सर्वापराधान्विगणय्य परमकारुणिकेन त्वया भक्तिरेव ममोद्दीप ६०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुसुमदशननामासर्वगन्धर्वराजःशशिधरवरमौलेर्देवदेवस्यदासः॥स्वकृतिनिजमहिम्नोभ्रष्टएवास्यरोषात्स्तवनमिदमकार्षीद्दिव्यदि
व्यंमहिम्नः॥२२॥

नीयेतिवाक्यतात्पर्यार्थः॥ २१॥ ॥इत्युक्तंकुसुमदशननामेतिअयंश्लोकस्तोत्रांतर्गतः।सुगम
श्चेतिनव्याख्यायतेसर्वंभद्रम्।इतउत्तरंसुरगुरुमभिपूज्यमित्यादिश्लोकंपठन्ति।हरिशंकरयो
र्भेदबोधोभवतुक्षुद्रधियामपीतियत्नात्।उभयार्थ।तयामयेदमुक्तंसुधियःसाधुविशो
धयन्तु॥ १॥यत्नज्ञोवक्रयारीत्याकर्तुंशक्तोविधांतरम्॥यद्यपीहतथाप्येषऋजुरध्वाप्रदर्शितः
॥ २॥श्लोकानुपात्तमिहतप्रसंगात्किंचिद्विदारितम्॥श्लोकोपात्तमपिनोवैरक्षरैःप्रतिपादितम्॥ ३
॥महिमाख्यस्तुतेर्व्याख्याप्रतिवाक्यंमनोहरा॥इयंश्रीमद्गुरोःपादस्पर्शयोरर्पितामया॥ ४॥रीकांतरं
कस्वनमधीरीतितःसारंसमुद्धृत्यकरोतिचेत्तदा॥शिवस्यविष्णोर्द्विजगीःसुपर्वणामसौद्विषच्छ
वमपिप्रपंचयेत्॥ ५॥भूतिभूषितदेहायद्विजराजेनराजते॥एकात्मनेनमोनित्यंहरयेचहरायच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰ ॥ ८ ॥ ॥ इतिपरमहंसपरिव्राजकाचार्य्यश्रीमद्विश्वेश्वरसरस्वतीचरणारविंदमधुकरेण
९१ मधुसूदनसरस्वतीसमाख्याधरेणाकेनचिद्विरचितामहिम्नाख्यस्तुतिव्याख्यासमाप्ता ॥ ॥

एम:
९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu